# उच्चतरविद्यालयानां कृते

## HIGHER SECONDARY COURSE

# ऐच्छिकम् - शास्त्रम्

## OPTIONAL SASTHRA

### कक्ष्या - १२

### Standard - XII

Government of Kerala
DEPARTMENT OF EDUCATION

STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING (SCERT); KERALA
2015

# राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारत भाग्य विधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड उत्कल बंगा।
विंध्य हिमाचल यमुना गंगा,
उच्छल जलधि तरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव जय-गाथा।
जनगण मंगलदायक जय हे,
भारत भाग्य विधाता।
जय हे, जय हे, जय हे,
जय जय जय, जय हे ।

# प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

*Prepared by:*
**State Council of Educational Research and Training (SCERT)**
PoojappuraThiruvaanthapuram - 695012, Kerala.
Website : www.scertkerala.gov.in e-mail : scertkerala@gmail.com
Phone : 0471 2341883, Fax 0471 2341869

Type setting and Layout : SCERT
Department of Education, Government of Kerala

*To be printed in quality paper - 80gsm maplitho (snow-white)*

# प्रास्ताविकम्।

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदा २०१४ - २०१५ तमे वर्षे परिवर्तितपाठ्यपद्धत्यनुसारम् एकादशवर्गस्य कृते पाठ्यपुस्तकं प्रवृत्तिपथमानीतम्। तस्यानुवर्तनरूपेण द्वादशवर्गस्य कृते निर्मितं पाठपुस्तकमिदम्। निर्दिष्टां पाठ्यपद्धतीमनुसृत्य एवास्मिन् पाठभागाः निर्द्धारिताः। उच्चतरविद्यालये द्वितीयवर्षे ऐच्छिकविषयत्वेव संस्कृतं पिपठिषूणां विध्यार्थिनां कृते समाकलितमिदं पुस्तकम्।

अस्मिन् व्याकरणविभागे अजन्तपुंलिङ्गप्रकरणं लघुसिद्धान्तकौमुदीतः तथा समासाश्च (केवलसमासः, अव्ययीभावः, तत्पुरुषः, बहुव्रीहिः, द्वन्द्वः) स्वीकृतः। तर्कशास्त्रे तर्कसंग्रहदीपिका च वर्तते। अपि च दर्शनपरिचयः, ज्योतिश्शास्त्रप्रवेशकश्च पृथक् एककत्वेन प्रदत्तः।

अध्यापकैः अभ्यसकार्याण्यपि यथायथं विरच्यन्ताम्। राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदा समायोजितायां तत्तद्विषये प्रवीणानां महाविद्यालयीयाध्यापकानाम् अन्येषां शिक्षाशास्त्रज्ञानां च नेतृत्वे प्रवृत्तायां कर्मशालायाम् एवास्य पुस्तकस्य सङ्कलनं कृतम्। अस्य उपयोगितासंवर्धनानुगुणं निर्देशादिकम् अध्यापकैः यदि सूच्येत तर्हि भविष्यत्काले उपयोगाय भवेत्।

पाठपुस्तकमिदम् उद्दिष्टं कार्यं निर्वोढुं प्रभवेदिति प्रतीक्षे।

**डा. एस्. रवीन्द्रन् नायर्**
निदेशकः
राज्यशैक्षिकानुसन्धानप्रशिक्षण
परिषद्, केरलाः

## TEXTBOOK DEVELOPMENT COMMITTEE

1. **Devi Prasad A.,** HSST Sanskrit, IJMHSS, Kottiyoor, Kannur
2. **Dr. Abhilash J.,** HSST Sanskrit, MKMHSS, Piravom, Ernakulam
3. **Dr. Mahesh Babu S. N.,** HSST Sanskrit, GHSS, Nadavarambu, Thrissur
4. **Krishna Kumari S.,** HSST Sanskrit, KVSHSS, Muthukulam, Alappuzha
5. **Madhu N.,** HSST Sanskrit, KVSHSS, Muthukulam, Alappuzha
6. **Ramachandran N. K.,** (Rtd.) DEO, Wayanad
7. **Sajikumar A. V.,** HSST Sanskrit, GHSS, Karupadanna, Thrissur
8. **Sankaranarayanan A.,** HSST Sanskrit, GSHSS, Tripunithura
9. **Sivakala S.,** HSST Sanskrit, GHSS, Meenangadi, Wayanadu
10. **Thankarajan Nambootiri,** HSST Sanskrit,CBHSS,Vallikunnu,Malappuram

## EXPERTS

1. **Prof. R.Vasudevan Potti,** Sivadhamam, Sreekandeswaram, TVPM
2. **Dr. P. Narayanan Namboodiri,** Prof. of Sanskrit, University of Calicut
3. **Dr. G. Sahadevan,** (Rtd.) Asso. Prof. University College, TVPM
4. **Dr. K. B. Rajeev,** HOD in Sanskrit-Jyotisha, Govt. Skt. College, TVPM

## GRAPHICS & LAYOUT

1. **Sreeraj V. P.,** Ernakulam

## ILLUSTRATION

1. **Varghese Kalathil,** Kannur
2. **Rajeevan Parayil,** Kannur

## ACADEMIC CO-ORDINATOR

1. **Dr. Shameeja.P. ,** Research Officer, SCERT, TVPM

# विषयानुक्रमणिका।

पाठस्य नाम                                        पुटसंख्या


एककम् - I    व्याकरणशास्त्रम्।

(१)    अजन्तपुंलिङ्गप्रकरणम् .............. ९

(२)    केवलसमासः। ......................... २५

(३)    अव्ययीभावसमासः। ................. २९

(४)    तत्पुरुषसमासः। ..................... ४३

(५)    बहुव्रीहिसमासः। ..................... ७५

(६)    द्वन्द्वसमासः। ......................... ८७

एककम् - II    तर्कशास्त्रम्।

(१)    तर्कसंग्रहदीपिका। ..................... १०१

एककम् - III    दर्शनपरिचयः।

(१)    कतिपयाः केरलीयदार्शनिकाः। ...... ११५

(२)    निर्वृतिपञ्चकम्। ..................... १२६

एककम् - IV    ज्योतिश्शास्त्रम्।

(१)    ज्योतिषामयनं चक्षुः। ................१३७



## एककम्-१

# अजन्तपुल्लिङ्गप्रकरणम्।

### आमुखम्

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम्। व्याक्रियन्ते इत्यस्य विविच्य क्रियन्ते इत्यर्थः। असाधुशब्देभ्यः साधुशब्दानां विविच्य अवगमनाय व्याकरणमुपकारकं भवति। संस्कृतपठनं सुगमं कर्तुम् आविष्कृतायाः पाठ्यपद्धतेः मूलं भवति व्याकरणपुस्तकमिदम्। भाषापठने व्याकरणपठनस्य अनिवार्यतां ज्ञात्वा सोदाहरणं व्याकरणतत्त्वानि अस्मिन् ग्रन्थे प्रतिपादितानि।


अयं ग्रन्थः सिद्धान्तान् ललितया रीत्या विवृणोति इति कारणेन सर्वेषां छात्राणां महदुपकारकः भविष्यति।

अकारान्तपुल्लिङ्गशब्दाः सामान्यतया सर्वैः ज्ञेयाः। अतः रामशब्दस्य सविस्तरं प्रतिपादनमत्र कृतम्। संस्कृतपठने समासज्ञानस्य महत्स्थानम् अस्ति। कमपि ग्रन्थं विना समासम् अवगन्तुं न शक्यते इत्यतः समासानामपि सामान्यपठनाय लघुसिद्धान्तकौमुद्याः समासभागाः अत्र स्वीकृताः।



## पठनाधिगमाः

- सुबन्तप्रत्ययान् अवगत्य सूत्राणि पठति लिखति च।
- सूत्राणि सोदाहरणं ज्ञात्वा रूपनिष्पत्तिं लिखति।
- संज्ञाविधायकानि सूत्राणि पठति।
- अकारान्तपुंल्लिङ्गस्य रामशब्दस्य रूपनिष्पत्तिं ज्ञात्वा स्वस्वपुस्तिकासु लिखति।
- परिभाषासूत्राणां प्रयोजनं ज्ञात्वा रूपनिष्पत्तिं लिखति।
- कोष्ठात्समुचितमुत्तरं निर्धार्य लिखति।
- सूत्रस्य सूत्रवृत्तेः वा भागेन रिक्तांशस्थलं पूरयति।
- परस्परबन्धं ज्ञात्वा यथोचितं योजयति।
- समासभेदान् अवगत्य सोदाहरणं स्वस्वपुस्तिकासु लिखति।
- सप्रमाणं समासकार्यं विशदीकृत्य लिखति।
- परिभाषाणाम् अर्थज्ञानपुरस्सरं समासरूपनिष्पत्तिं ज्ञात्वा लिखति।
- वार्तिकानामर्थान् ज्ञात्वा प्रक्रियां लिखति।



१.१

## प्रथमः पाठः

# अजन्तपुल्लिङ्गप्रकरणम्।



## प्रवेशकः।

**रामो** राजमणिः सदा विजयते **रामं** रमेशं भजे
**रामेणा**भिहिता निशाचरचमू **रामाय** तस्मै नमः।
**रामान्ना**स्ति परायणं परतरं **रामस्य** दासोऽस्म्यहम्
**रामे** चित्तलयः सदा भवतु मे **हे राम**! मामुद्धर।।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| राजमणिः रामः | - | राजरत्नः रामः |
| सदा विजयते | - | सर्वदा विजयी भवति। |
| रमेशं रामं भजे | - | अहं रमानाथं रामं नमस्करोमि। |
| (येन) रामेण निशाचरचमुः | - | (येन) निशाचरसैन्यं |
| अभिहता | - | हतं भवति |
| तस्मै रामाय नमः | - | तस्मै रामाय नमः (नमस्कारं अर्पयामि) |

रामात् परतरं परायणं नास्ति- रामात् श्रेष्ठतरम् आश्रयं न भवति

अहं रामस्य दासोऽस्मि - अहं रामस्य दासः भवामि
मे चित्तलयः सदा रामे अस्तु - मम मनसः लयः रामे भवतु
हे राम मामुद्धर - हे राम माम् उन्नीयत।

हे छात्राः, श्लोकेऽस्मिन् रामशब्दस्य सर्वासु विभक्तिषु वर्तमानानि एकवचनरूपाणि सन्निवेशितानि। तानि चित्वा लिखन्तु। द्विवचनबहुवचनरूपाण्यपि अध्यापकसाहाय्येन चिन्वन्तु।

| अकारान्तः पुल्लिंगः राम शब्दः। | | | |
|---|---|---|---|
| | ए.व. | द्वि. व. | ब. व. |
| प्रथमा | रामः | रामौ | रामाः |
| स. प्रथमा | हे राम | हे रामौ | हे रामाः |
| द्वितीया | रामं | रामौ | रामान् |
| तृतीया | रामेण | रामाभ्याम् | रामैः |
| चतुर्थी | रामाय | रामाभ्याम् | रामेभ्यः |
| पञ्चमी | रामात् | रामाभ्याम् | रामेभ्यः |
| षष्ठी | रामस्य | रामयोः | रामाणाम् |
| सप्तमी | रामे | रामयोः | रामेषु।। |

## प्रातिपदिकसंज्ञाविधायकं सूत्रम्।

**अर्थवदधातुरप्रत्ययः प्रातिपदिकम् १।२।४५।।**

धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वाऽर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात्। अर्थवद् अधातुः अप्रत्ययः प्रातिपदिकम् इति चतुष्पदं सूत्रम्। यथा "रामः" इति पदे राम इत्यस्य प्रातिपदिकत्वम्।

**कृत्तद्धितसमासाश्च २।२।४६।।**

कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः। कृत्तद्धितसमासाः च इति द्विपदं सूत्रम्।

रमन्ते योगिनोऽस्मिन् इति रामः। अत्र कृत्तद्धितसमासाश्च इति सूत्रेण , दशरथस्य पुत्रः दाशरथिः इत्यत्र तद्धितान्ताच्च प्रातिपदिकसंज्ञा।

## स्वादिप्रत्ययविधायकं विधिसूत्रम्।

**स्वौ-जसमौट्-छष्टाभ्याम्-भिस्-ङे-भ्याम्- भ्यस्- ङसि- भ्याम्- भ्यस्- ङस् ओस् आम्- ङ्योस्- सुप्** ४।१।२ प्रातिपदिकात् स्वादयः प्रत्ययाः स्युः।

| | | | | |
|---|---|---|---|---|
| सु | औ | जस् | इति | प्रथमा। |
| अम् | औट् | शस् | इति | द्वितीया। |
| टा | भ्याम् | भिस् | इति | तृतीया। |
| ङे | भ्याम् | भ्यस् | इति | चतुर्थी। |
| ङसि | भ्याम् | भ्यस् | इति | पञ्चमी। |
| ङस् | ओस् | आम् | इति | षष्ठी। |
| ङि | ओस् | सुप् | इति | सप्तमी। |

यथा रामशब्दात् स्वादयः प्रत्ययाः । राम + सु इति।

**ङ्यात्प्रातिपदिकात्** ४।१।२।
**प्रत्ययः** ३।१।२।
**परश्च** ३।१।२।

'उपदेशेऽजनुनासिक इत्'
उपदेशे अनुनासिक अच्
इत्संज्ञः स्यात्

इत्यधिकृत्य। ङ्यान्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः।

## एकवचनादिसंज्ञाविधायकं सूत्रम्।

**सुपः** १।४।१०।

सुपस्त्रीणि त्रीणि वचनान्येकश एकवचन-द्विवचन- बहुवचनसंज्ञानि स्युः। सु इति एकवचनम्। औ इति द्विवचनम् । जस् इति बहुवचनं च।

(एकवचन-द्विवचनविधायकं नियमसूत्रम्)

**द्व्यैकयोर्द्विवचनैकवचने** १।४।२२।।

द्वित्वैकत्वयोः एकवचनद्विवचने स्तः।

(यथा औ इत्यस्य द्विविचनसंज्ञा। जस् इत्यस्य बहुवचनसंज्ञा)

## अवसानसंज्ञाविधायकं सूत्रम्।

**विरामोऽवसानम् २।४।२२०।।**

वर्णानामभावोऽवसानसंज्ञः स्यात्। यथा राम इत्यत्र अकारस्य अवसानसंज्ञः। रुत्वविसर्गौ- रामः इति।

प्रथमा एकवचनम्- राम + सु - रामः।

*अकारान्तस्य रामशब्दस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिक'मिति सूत्रेण प्रातिपदिकसंज्ञा। तस्मात् प्रथमाविभक्तौ एकत्वविवक्षायां 'द्व्यैकयोर्द्विवचनैकवचने' इति सूत्रेण एकवचने स्वौजसमौट्.......... इत्यादिना सूत्रेण सुप्रत्ययः। राम सु। 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां 'तस्य लोपः' इति लोपः। राम स् इति स्थिते ' 'ससजुषो रुः' इति रुत्वे राम र्। 'विरामोऽवसानम्' इति सूत्रेण अवसानसंज्ञायां 'खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गे रामः इति रूपम्।।*

## एकशेषविधायकं सूत्रम्।

**सरूपाणामेकशेष एकविभक्तौ १।२।६४।।**

एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते। सरूपाणाम् एकशेष एकविभक्तौ इति त्रिपदं सूत्रम्।

यथा- राम राम + औ इत्यत्र अनेन सूत्रेण एकः रामशब्दः एव शिष्यते।

**पूर्वसवर्णदीर्घविधायकं सूत्रम्।**

**प्रथमयोः पूर्वसवर्णः ६।१।१०२।।**

अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।

प्रथमयोः पूर्वसवर्णः इति द्विपदं सूत्रम्।

**नादिचि ६।१।१०४।**

आदिचि परे न पूर्वसवर्णदीर्घः। न आद् इचि इति त्रिपदं सूत्रम्। रामशब्दात् प्रथमाद्विवचनप्रत्यये राम +औ इत्यत्र न पूर्वसवर्णदीर्घः।

इच् परत्वाभावात्।

वृद्धिरेचि इति वृद्धिः।

**प्रथमाद्विवचनम्**

राम +औ -रामौ।

रामशब्दात् प्रथमाद्विवचने *स्वौजसमौट्......... इत्यादिना सूत्रेण औ प्रत्यये राम +राम +औ । 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकशेषे राम +औ इति। 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घे प्राप्ते 'नादिचि' इति सूत्रेण तन्निषेधे 'वृद्धिरेचि' इति सूत्रेण अकार-औकारयोः स्थाने वृद्धौ औकार एकादेशे रामौ इति रूपम्।।*

**बहुषु बहुवचनम् १।४।२१।।**

बहुत्वविवक्षायां बहुवचनं स्यात्। बहुषु, बहुवचनम् इति द्विपदं सूत्रम्।। यथा रामशब्दात् बहुत्वविवक्षायां बहुवचनप्रत्ययः स्यात्।

प्रथमाबहुवचने राम जस्।

## इत्संज्ञाविधायकं सूत्रम्

**चुटू १।३।७।।**

प्रत्ययादौ चुटू इतौ स्तः। यथा राम जस् इत्यत्र ज् इत्यस्य अनेन सूत्रेण इत्संज्ञा।

## विभक्तिसंज्ञाविधायकं सूत्रम्

**विभक्तिश्च १।४।१०४।।**

सुप्तिङौ विभक्तिसंज्ञौ स्तः। यथा राम जस् इत्यत्र जसः विभक्तिसंज्ञा। विभक्तिः च इति पदच्छेदः।

## इत्संज्ञानिषेधसूत्रम्

**न विभक्तौ तुस्माः १।३।४।।**

विभक्तिस्थास्तवर्गसकारमकारा न इतो स्युः। यथा - राम+जस् इत्यत्र वर्तमानस्य सकारस्य नेत्वम्। न विभक्तौ तुस्माः इति त्रिपदं सूत्रम्। यथा रामाः।

*'खरवसानयोर्विसर्जनीयः'*
खरि अवसाने च पदान्तस्य रेफस्य विसर्गः स्यात्।

**रामाः।**

*रामशब्दात् प्रथमाबहुवचनविवक्षायां 'बहुषु बहुवचनम्' इति सूत्रेण बहुवचनम्। जसि कृते राम राम राम जस् इति। तत्र 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेण एकः रामशब्दः एव शिष्यते। राम जस् इति। 'चुटू' इति सूत्रेण ज् इत्यस्य इत्संज्ञायां लोपे राम अस् इति स्थिते सकारस्य 'हलन्त्यम्' इत्यनेनेत्संज्ञायाः प्राप्तौ न विभक्तौ तुस्माः इत्यनेन तन्निषेधे 'प्रथमयोः पूर्वसवर्णः' इति पूर्वपरयोः पूर्वसवर्णदीर्घे सकारस्य रुत्वे विसर्गे च रामाः इति रूपम्।*

## सम्बुद्धिसंज्ञाविधायकं सूत्रम्।

**एकवचनं सम्बुद्धिः २।३।४९।।**

सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञं स्यात्। एकवचनं सम्बुद्धिः इति द्विपदं सूत्रम्। यथा - हे राम इत्यत्र सम्बुद्धिसंज्ञः।

## अङ्गसंज्ञाविधायकं सूत्रम्

**यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् १।४।१३।।**

यः प्रत्ययो यस्मात् क्रियते तदादिशब्दस्वरूपं तस्मिन् परे अङ्गसंज्ञं स्यात्। यस्मात् प्रत्ययविधिः तदादि प्रत्यये अङ्गम् इति पञ्चपदं सूत्रम्।

यथा - हे राम इत्यत्र मकारात्परस्य अकारस्य अङ्गसंज्ञा।

## लोपविधायकं सूत्रम्।

**एङ्ह्रस्वात्सम्बुद्धेः ६।१।६९।।**

एङन्ताद्घ्रस्वान्ताच्चाऽङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत्। एङ् ह्रस्वात् सम्बुद्धेः इति त्रिपदं सूत्रम्।

यथा- हे राम सु इत्यत्र सोर्लोपः।

सम्बोधनप्रथमा एकवचनम्- हे राम।

> **'वृद्धिरेचि'**
>
> आदेचि परे वृद्धिरेकादेशः स्यात्।

*रामशब्दात् सम्बोधनप्रथमायाम् एकवचने स्वौजसमौट्............ इत्यादिना सु प्रत्ययः। हे राम सु। 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण उकारस्य इत्संज्ञायां लोपे हे रामस् इति स्थिते 'एकवचनं सम्बुद्धिः' इति सूत्रेण प्रत्ययस्य सम्बुद्धिसंज्ञा। 'यस्मात् प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्' इति सूत्रेण अङ्गसंज्ञायाम् 'एङ् ह्रस्वात्सम्बुद्धेः' इति सम्बुद्ध्यवयवस्य सकारस्य लोपे हे राम इति रूपम्।*

हे रामौ। हे रामाः इति। द्विवचनं बहुवचनं च प्रथमावत्।)

## पूर्वरूपविधायकं सूत्रम्।

**अमि पूर्वः ६।१।१०७।।**

अकोऽम्यचि पूर्वरूपमेकादशः स्यात्।

अमि पूर्वः इति द्विपदं सूत्रम्।

यथा रामम्।

*रामशब्दात् द्वितीयैकवचनप्रत्यये राम +अम्। 'अमि पूर्वः' इति सूत्रेण पूर्वरूपमेकदेशे रामम् इति रूपम्।*

## इत्विधायकं सूत्रम्।

**लशक्वतद्धिते १।३।८।।**

तद्धितवर्जप्रत्ययाद्या लशकवर्गाः इतः स्युः।

लशकु अतद्धिते इति द्विपदं सूत्रम्। कुशब्देन कवर्गः गृह्यते।

## नत्वविधयकं सूत्रम्।

**तस्माच्छसो नः पुंसि ६।१।१०३।।**

पूर्वसवर्णदीर्घात्परो यः शसः सस्तस्य नः स्यात्पुंसि। तस्मात् शसः नः पुंसि इति चतुष्पदं सूत्रम्।

## णत्वविधायकं सूत्रम्।

**अट्कुप्वाङ्नुम्व्यवायेऽपि ८।४।२।।**

अट् कवर्गः पवर्गः आङ् नुम् एतैर्व्यस्तैर्यथासम्भवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात्समानपदे।

अट्कुप्वायङ्नुम्व्यवाये अपि इति द्विपदं सूत्रम्।

**रषाभ्यां नो णः समानपदे** (८-४-१) इति सूत्रम् अनुवर्तते।

## णत्वनिषेधसूत्रम्।

**पदान्तस्य ८।४।३७।।**

पदान्तस्य नस्य णत्वं न स्यात्।

एकपदं सूत्रम्।

यथा -रामान्।

**'हलन्त्यम्'**

उपदेशेऽन्त्यं हल् इत् स्यात्।

*रामशब्दात् द्वितीयाबहुवचनप्रत्यये राम + शस् । 'लशक्वतद्धिते' इति सूत्रेण शकारस्येत्संज्ञायां लोपे राम अस्। 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे रामास्। 'तस्माच्छसो नः पुंसि' इति सूत्रेण सस्य नकारे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण णत्वे प्राप्ते 'पदान्तस्य' इति सूत्रेण तन्निषेधे रामान् इति रूपम्।*

## इनात्स्यादेशविधायकं सूत्रम्।

**टाङसिङसामिनात्स्याः ७।१।१२।।**

अदन्ताट्टादीनामिनादयः स्युः। टाङसिङसाम् इनात्स्याः इति द्विपदं सूत्रम्।

| प्रत्ययाः | आदेशाः |
|---|---|
| टा | इन |
| ङसि | आत् |
| ङस् | स्य |

टाङसिङसां इनादयः आदेशाः यथाक्रमं भवन्ति।

यथा रामेण।

'आद्गुणः'
अवर्णादचि परे पूर्वपरयोः गुण एकादेशः स्यात्।

*रामशब्दात् तृतीयैकवचनप्रत्यये राम टा। 'टाङसिङसामिनात्स्याः' इति सूत्रेण टा इत्यस्य स्थाने इन आदेशे राम इन। 'आद्गुणः' इति सूत्रेण गुणे रामेन। 'अट्कुप्वाङ्नुम्..........' इत्यनेन नस्य णत्वे रामेण इति रूपम्।*

## दीर्घविधायकं सूत्रम्।

**सुपि च ७। ३। १०२।**

यञादौ सुप्यतोऽङ्गस्य दीर्घः स्यात्। सुपि च इति द्विपदं सूत्रम्। यथा रामाभ्याम्।।

*रामशब्दात् तृतीयाद्विवचनप्रत्यये राम भ्याम् इति स्थिते 'यस्मात् प्रत्ययविधि..........' इत्यनेन अङ्गसंज्ञायां 'सुपि च' इति सूत्रेण अङ्गस्य दीर्घे रामाभ्याम् इति रूपम्।।*

## ऐसादेशविधायकं सूत्रम्।

**अतो भिस ऐस् ७।२।१।।**

अकारान्तादङ्गाद्भिस ऐस् स्यात्। अतः भिस ऐस् इति त्रिपदं सूत्रम्।

**अनेकाल्शित्सर्वस्य** । यथा - रामैः।

*रामशब्दात् तृतीयाबहुवचनप्रत्यये राम + भिस्। 'अतो भिस ऐस्' इति सूत्रेण ऐसादेशे राम ऐस् । 'वृद्धिरेचि' इति वृद्धौ रामैस्। सकारस्य रुत्वे विसर्गे च रामैः इति रूपम्।।*

## यादेशविधायकसूत्रम्।

**ङेर्यः ७।१।१३।।**

अतोऽङ्गात्परस्य ङेर्यादेशः। ङेः यः इति द्विपदं सूत्रम्। यथा रामाय।

**स्थानिवदादेशोऽनल्विधौ १।१।५६।।**

आदेशः स्थानिवत्स्यान्न तु स्थान्यलाश्रयविधौ। इति स्थानिवत्वात् सुपि चेति दीर्घः। स्थानिवद् आदेशः अनल्विधौ इति त्रिपदं सूत्रम्।

यथा रामाय।

'अकः सवर्णे दीर्घः'

अकः सवर्णे अचि परे

पूर्वपरयोः दीर्घ एकादेशः स्यात्।

*रामशब्दात् चतुर्थ्यैकवचनप्रत्यये राम ङे। 'ङेर्यः' इति सूत्रेण ङे इत्यस्य यादेशे राम य। 'स्थानिवदादेश....' इत्यनेन सूत्रेण स्थानिवद्भावे सुपि च इति सूत्रेण दीर्घे रामाय इति रूपम्।*

चतुर्थीद्विवचनं तृतीयाद्विवचनवत्- रामाभ्याम्।

## एत्वविधायकसूत्रम्।

**बहुवचने झल्येत् ७।३।२०३।**

झलादौ बहुवचने सुप्यतोऽङ्गस्यैकारः स्यात्। बहुवचने झलि एत् इति त्रिपदं सूत्रम्। यथा रामेभ्यः।

राम+ भ्यस्- रामेभ्यस्।

*राम भ्यस् इति स्थिते झलादौ बहुवचने भ्यस् प्रत्यये परे राम इत्यकारान्तस्य अङ्गस्य 'बहुवचने झल्येत्' इति सूत्रेण एत्वे रामेभ्यस्। सकारस्य रुत्वे विसर्गे च रामेभ्यः इति रूपम्।*

## चर्त्वविधायकसूत्रम्।

**वाऽवसाने ८।४।५६।।**

अवसाने झलां चरो वा स्यात्। वा अवसाने इति द्विपदं सूत्रम्। यथा रामात्, रामाद्।

*रामशब्दात् पञ्चम्यैकवचनप्रत्यये राम ङसि। 'टाङसिङसां.......' इत्यनेन सूत्रेण आद् आदेशे राम आत्। 'अकः सवर्णे दीर्घः' इत्यनेन सूत्रेण सवर्णदीर्घे रामात् इति रूपम्। अत्र 'वावसाने' इति सूत्रेण तकारस्य चर्त्वपक्षे (तकारस्य तकार एव) रामात् इति। चर्त्वाभावपक्षे 'झलां जशोऽन्ते' इति जश्त्वे रामाद् इति ।*

रामस्य

*रामशब्दात् षष्ठ्यैकवचने प्रत्यये राम ङस्। 'टाङसिङसामिनात्स्याः' इत्यनेन सूत्रेण ङस्प्रत्ययस्य स्यादेशे रामस्य इति रूपम्।*

## एत्वविधायकसूत्रम्।

**ओसि च ७।३।१०४।।**

ओसि परे अतोऽङ्गस्यैकारः स्यात्। ओसि च इति द्विपदं सूत्रम्। यथा रामयोः।

*रामशब्दात् षष्ठीद्विवचनप्रत्यये राम ओस् । 'ओसि च' इति सूत्रेण एकारादेशः। रामे ओस्। 'एचोऽयवायावः' इति सूत्रेण अयादेशे रामयोस्। सकारस्य रुत्वे विसर्गे च रामयोः इति रूपम्।*

**'एचोऽयवायावः'**

एचःक्रमाद् अय् अव् आय् आव् एते स्युरचि।

## नुडागमविधायकसूत्रम्।

**ह्रस्वनद्यापो नुट् ७।१।५४।।**

ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्। ह्रस्वनद्यापः नुट् इति द्विपदं सूत्रम्। यथा रामशब्दात् षष्ठीबहुवचनप्रत्यये राम आम्। अत्र ह्रस्वान्तात् नुडागमे राम न् आम्।

**नामि ६।४।३।।**

नामि परे अजन्ताङ्गस्य दीर्घः स्यात्।

एकपदं सूत्रम्।

यथा रामाणाम्।

'तस्य लोपः'

तस्येतो लोपः स्यात्

*रामशब्दात् षष्ठीबहुवचनप्रत्यये राम आम्। 'ह्रस्वनद्यापो नुट्' इति सूत्रेण नुडागमे अनुबन्धलोपे राम नाम्। 'नामि' इति सूत्रेण रामशब्दस्य अकारस्य दीर्घे रामानाम्। 'अट्कुप्वाङ्..........' इत्यादिना सूत्रेण नस्य णत्वे रामाणाम् इति रूपम्।*

## षत्वविधायकसूत्रम्

**आदेशप्रत्यययोः ८।३।५१।।**

इण्कवर्गाभ्यां परस्यापदान्तस्याऽऽदेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्। ईषद्विवृतस्य सस्य तादृश एव षः।

यथा रामेषु

रामशब्दात् सप्तमीबहुवचनप्रत्यये राम सुप्। 'हलन्त्यम्' इति सूत्रेण पकारस्य इत्संज्ञायां लोपे राम सु। 'बहुवचने झल्येत्' इति सूत्रेण अकारस्य एत्वे रामे सु। 'आदेशप्रत्यययोः' इति सूत्रेण सकारस्य षकारे रामेषु इति रूपम्।



## पठनप्रवर्तनानि

**कोष्ठात्समुचितमुत्तरं निर्धार्य लिखत-**

१. **रामः इति पदे राम इत्यस्य प्रातिपदिकत्वं केन सूत्रेण विधीयते?**
(ङ्यात्प्रातिपदिकात्, कृत्तद्धितसमासाश्च, अर्थवदधातुरप्रत्ययः प्रातिपदिकम्)

२. **सरूपाणामेकशेष ----------।**
(अवसानम्, एकविभक्तौ, एकवचने)

३. **एषु इत्संज्ञा विधायकं सूत्रं किम्?**
( न विभक्तौ तुस्माः, लशक्वतद्धिते, सुपि च)

४. **राम अम् इत्यत्र पूर्वरूपं केन सूत्रेण विधीयते?**
( अमि पूर्वः, पदान्तस्य, सुपि च)

५. **अतो भिस ..............।**
( ओस्, अस्, ऐस्)

६. **अधोनिर्दिष्टेषु सूत्रेषु णत्वविधायकं सूत्रं किम्?**

(तस्माच्छसो नः पुंसि, अट्कुप्वाङ्नुम्व्यवायेऽपि, टाङसिङसामिनात्स्याः)

७. **नामि परे अजन्ताङ्गस्य ———— स्यात्।**

(ह्रस्वः, दीर्घः, पूर्वरूपम्)

८. **रामेषु इति रूपसिद्ध्यर्थं अधोनिर्दिष्टेषु किं सूत्रं प्रवर्तते।**

(आदेशप्रत्यययोः, ह्रस्वनद्यापो नुट्, नामि)

**वाक्येन वाक्यद्वयेन वा उत्तरं लिखत-**

१. सूत्राणि कति विधानि ? तानि कानि?

२. राम औ इत्यत्र पूर्वसवर्णदीर्घनिषेधसूत्रं किम्/ कुतः?

३. रामेण इति रूपं कथं सिद्ध्यति?

४. 'इन' आदेशः केन सूत्रेण विधीयते?

५. रामात्, रामाद् इति रूपद्वयं कथं सिद्ध्यति?

**सूत्राणि व्याख्यात-**

१. कृत्तद्धितसमासाश्च।

२. प्रथमयोः पूर्वसवर्णः।

३. विभक्तिश्च।

४. अमि पूर्वः।

५. तस्माच्छसो नः पुंसि।

६. आदेशप्रत्यययोः।

**रूपं सप्रमाणं साधयत**

१. हे राम

२. रामौ

३. रामात्

४. रामाणाम्


५. रामयोः

६. रामेभ्यः

७. रामेषु

## यथोचितं योजयत

| क | ख |
|---|---|
| एङ्ह्रस्वात्सम्बुद्धेः | रामम् |
| अमि पूर्वः | रामस्य |
| टाङसिङसामिनात्स्याः | हे राम |
| ह्रस्वनद्यापो नुट् | रामेषु |
| आदेशप्रत्यययोः | रामाणाम् |



अथ समासप्रकरणम्



१.२

## द्वितीयः पाठः

# केवलसमासः।



### प्रवेशकः।

समसनं समासः। अनेकस्य पदस्य एकपदीभवनं समासः इत्यर्थः। समासः सुबन्तानां भवति, नतु तिङन्तानाम्। समासे पूर्वत्र श्रूयमाणं पदं पूर्वपदमिति, उत्तरत्र श्रूयमाणं पदम् उत्तरमदमिति च व्यवह्रियते। समासे जाते पूर्वपदम् उत्तरपदम् च प्रातिपदिकरूपेण स्थितं भवति। ततः समस्तात् पदात् विभक्तिः योजनीयः।

वृत्यर्थावबोधकं वाक्यं विग्रहः। समासादेरर्थं बोधयितुं यद्वाक्यमुच्यते तद्वाक्यं विग्रहः इति व्यवह्रियते। संहितायां सन्धिः। पदयोः पदानां वा परस्परान्वयः समासः इति। समासः पञ्चधा। स च विशेषसंज्ञाविनिर्मुक्तः केवलसमासः प्रथमः।।१।। प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावः द्वितीयः।।२।। प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषः तृतीयः। तत्पुरुषभेदः कर्मधारयः। कर्मधारयभेदो द्विगुः।।३।। प्रायेणान्यपदार्थप्रधानो बहुव्रीहिश्चतुर्थः।।४।। प्रायेणोभयपदप्रधानो द्वन्द्वः पञ्चमः।।५।।

**समर्थः पदविधिः २।२।२।**

पदसम्बन्धी यो विधिः सः समर्थाश्रितो बोध्यः। समर्थः पदविधिः इति द्विपदं सूत्रम्।

पदार्थाभिधानं वृत्तिः। कृत्- तद्धित-समास- एकशेष-

सनाद्यन्तधातुरूपाः पञ्च वृत्तयः। वृत्त्यर्थावबोधकं वाक्यं विग्रहः। स च लौकिकोऽलौकिकश्चेति द्विधा।

**सह सुपा २।१।४।**

सुप् सुपा सह वा समस्यते। सह सुपा इति द्विपदं सूत्रम्। समासत्वात् प्रातिपदिकत्वेन सुपो लुक्। भूतपूर्वे चरडिति निर्देशात्पूर्वनिपातः।
यथा भूतपूर्वः।

*पूर्वं भूतः भूतपूर्वः इति लौकिकविग्रहः। पूर्व अम् भूत सु इत्यलौकिकविग्रहे 'सह सुपा' इति समासे ' सुपो धातुप्रातिपदिकयोः इति सुपः लुकि पूर्वभूत इति। 'भूतपूर्वे चरट्' इति निर्देशात् भूतशब्दस्य पूर्वनिपाते, प्रातिपदिकत्वात् सौ रुत्वे विसर्गे भूतपूर्वः इति रूपम्।*

**इवेन समासो विभक्त्यलोपश्च।** (वार्तिकम्)- इवशब्देन सह समासे विभक्तिलोपो न स्यात्।

यथा वागर्थौ इव - वागर्थाविव।।

*वागर्थौ इव इति लौकिकविग्रहः। वागर्थ औ इव इति अलौकिकविग्रहः। 'इवेन समासो विभक्त्यलोपश्च इति' वार्तिकेन समासे वागर्थौ इव । 'एचोऽयवायावः' इति आवादेशे वागर्थाविव इति रूपम्।*

इति केवलसमासः।



## पठनप्रवर्तनानि

**कोष्ठात्समुचितमुत्तरं निर्धार्य लिखत**

१. समसनं ———। (सन्धिः, समासः, विग्रहः)

२. वृत्त्यर्थावबोधकं वाक्यं———। (सन्धिः, विग्रहः, समासः)

३. समासः———। (एकधा, चतुर्था, पञ्चधा)

४. समर्थः———। (सह सुपा, पदविधिः, वृत्तिः)

५. ——— चरट्। (सह सुपा, इवेन, भूतपूर्वे)

६. सुपो धातुप्रातिपदिकयोः इति सूत्रेण——— विधीयते। (सुपः लुक्, समासः, आदेशः)

**उत्तरयत-**

१. को नाम विग्रहः? भूतपूर्वः इत्यस्य लौकिकम् अलौकिकं च विग्रहं लिखत।

२. तत्पुरुषसमासः कः? कस्य भेदः भवति कर्मधारयः?

३. द्विगोः लक्षणं किम्?

४. वृत्तयः काः?

५. भूतपूर्वः इति रूपं साधयत?

६. इवशब्देन सह समासः। अत्र नियमः कः?

# अधिकविस्तरः
## समासः

| केवलसमासः | अव्ययीभावः। | तत्पुरुषः | बहुव्रीहिः। | द्वन्द्वः |
|---|---|---|---|---|
| (विशेषसंज्ञाविनिर्मुक्तः) सह सुपा। भूतपूर्वः | (प्रायेण पूर्वपदार्थ-प्रधानः) 'अव्ययं विभक्ति-समीपसमृद्धि....' अधिहरि। | 'द्वितीया श्रितातीतपतित....' कृष्णाश्रितः तत्पुरुषभेदः कर्म-धारयः। कृष्णसर्पः कर्मधारयभेदः द्विगुः। संख्यापूर्वो द्विगुः सप्तर्षयः। | (प्रायेण अन्य-पदार्थप्रधानः) 'अनेकमन्यपदार्थे' पीताम्बरः। | (प्रायेण उभय-पदार्थप्रधानः) 'चार्थे द्वन्द्वः' ईशकृष्णौ। |



# १.३

## तृतीयः पाठः

# अव्ययीभावसमासः।

**सूत्रम्- अव्ययीभावः २।१।५।**

अधिकारोऽयं प्राक् तत्पुरुषात्। तत्पुरुषसमासं यावत् अव्ययीभावः इति पदमनुवर्तते इत्यर्थः।

**सूत्रम्- अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रति-शब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु २।१।६।।**

विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह नित्यं समस्यते सोऽव्ययीभावः।

**टिप्पणिः** - द्विपदं सूत्रम्। अव्ययं विभक्ति- समीप- समृद्धि- व्यृद्धि- अर्थाभाव- अत्यय- असम्प्रति- शब्दप्रादुर्भाव- पश्चात्- यथा - आनुपूर्व्य- यौगपद्य- सादृश्य- सम्पत्ति- साकल्य- अन्तवचनेषु इति पदच्छेदः। विभक्त्यादीनामर्थे वर्तमानानि अव्ययानि सुबन्तैः सह नित्यं समस्यन्ते। एते अव्ययीभावसमासः। अयं नित्यसमासः। तेन स्वपदविग्रहो नास्ति। अस्वपदविग्रह एव वक्तुं शक्यते।

विभक्तौ अव्ययीभावस्योदाहरणं यथा अधिहरि इति।

*हरौ इति अधिहरि। हरि ङि अधि इति अलौकिकविग्रहः। 'अव्ययं विभक्ति....' इत्यादिना सूत्रेण समासः। विभक्त्यर्थे अधि इत्यव्ययञ्च। 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायां सुपो धातुप्रातिपदिकयोः इति सुपः लुकि हरि अधि। (विस्तृतं रूपमन्यत्र)*

**सूत्रम्-प्रथमानिर्दिष्टं समास उपसर्जनम् । १ ।२ ।४३ ।।**
समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात्।

**‘सुपो धातुप्रातिपदिकयोः’**
धातुप्रातिपदिकयोःअवयवस्य सुपो लुक् स्यात्।

**टिप्पणिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण उपसर्जनसंज्ञा विधीयते। समासशास्त्रे प्रथमाविभक्तिनिर्दिष्टमुपसर्जनसंज्ञं स्यात्। यथा- हरौ इति अधिहरि इत्यत्र ‘अव्ययं विभक्ति’ इति सूत्रेण समासः। अस्मिन् सूत्रे अव्ययम् इति प्रथमा। अतः अधि इत्यस्य उपसर्जनसंज्ञा ।

**सूत्रम्- उपसर्जनं पूर्वम् २ ।२ ।३० ।**
समासे उपसर्जनं प्राक्प्रयोज्यम्।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण उपसर्जनस्य पूर्वप्रयोगः। समासे उपसर्जनं प्राक् प्रयोज्यम्।

*यथा - हरौ इति अधिहरि इत्यत्र ‘अव्ययं विभक्ति...’ इत्यादिना सूत्रेण समासः। ‘प्रथमानिर्दिष्टं समस उपसर्जनम्’ इति अधि इत्यस्य उपसर्जनसंज्ञायाम् ‘उपसर्जनम् पूर्वम्’ इति पूर्वप्रयोगे अधि हरि। तस्मात् सु प्रत्यये अधि हरि सु। ‘अव्ययीभावश्च’ इति सूत्रेण अव्ययीभावस्य नपुंसकत्वात् ‘अव्ययादाप्सुपः’ इति सुपः लुकि अधिहरि इति रूपम्।*

**सूत्रम्- अव्ययीभावश्च २ ।४ ।१८ ।**
अव्ययीभावः नपुंसकं स्यात्।

**टिप्पणिः-** द्विपदं सूत्रम्। अव्ययीभावः च इति। अयं अव्ययीभावः नपुंसकं स्यात्। यथा हरौ इति अधिहरि।

**सूत्रम्- नाव्ययीभावादतोऽम्त्वपञ्चम्याः २ ।४ ।८३ ।**
अदन्तादव्ययीभावत्सुपो न लुक् तस्य पञ्चमीं विना अमादेशश्च स्यात्।

**टिप्पणिः-** न अव्ययीभावात् अतः अम् तु अपञ्चम्याः इति षट्पदं सूत्रम्। 'अव्ययादाप्सुपः' इति सूत्रेण विधीयमानस्य सुपः लुक् अनेन सूत्रेण निषिध्यते। अदन्तादव्ययीभावात्सुपो न लुक्, तस्य पञ्चमीं विना अमादेशश्च स्यात्।

> **'अव्ययादाप्सुपः'**
> अव्ययाद्विहितस्यापः सुपश्च लुक् स्यात्।

> *गां पातीति गोपाः, तस्मिन् इत्यधिगोपम्। गोपा ङि अधि इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति...' इत्यादिना समासे सप्तम्यर्थे अधि इत्यव्ययं च । अधि इत्यस्य उपसर्जनसंज्ञायां पूर्वप्रयोगे अधिगोपा ङि। 'सुपो धातुप्रातिपदिकयोः' इति सुपः लुकि अधिगोपा। अव्ययीभावश्च इति नपुंसकत्वम्। ह्रस्वे अधिगोप। तस्मात्सुप्रत्यये अधिगोप सु। अत्र 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' इति अमादेशे अधिगोप अम्। 'अमि पूर्वः' इति पूर्वरूपे अधिगोपम् इति रूपम्।*

**सूत्रम् - तृतीयासप्तम्योर्बहुलम् २।४।८४।**

अदन्तादव्ययीभावात् तृतीयासप्तम्योर्बहुलमम्भावः स्यात्।

**टिप्पणिः-** तृतीयासप्तम्योः बहुलम् इति द्विपदं सूत्रम्। अनेन सूत्रेण विकल्पेन तृतीयासप्तम्योः अम्भावः विधीयते।

> **'ह्रस्वे नपुंसके प्रातिपदिकस्य'**
> नपुंसके प्रातिपदिकस्याजन्तस्य ह्रस्वः स्यात्।

> *गाः पातीति गोपाः, तस्मिन् इति अधिगोपम्। अधिगोपशब्दात् तृतीयैकवचनप्रत्यये टा विभक्तौ अधिगोप टा। अत्र 'तृतीयासप्तम्योर्बहुलम्' इत्यनेन विकल्पेन अम्भावे अधिगोप अम्। पूर्वरूपे अधिगोपम्।*
>
> *अमः अभावे 'टाङसिङसामिनात्स्याः' इति इनादेशे अधिगोप इन। 'आद्गुणः' इति गुणे अधिगोपेन इति रूपम्।*

एवं सप्तम्याम् अधिगोपे अधिगोपम् इति रूपद्वयम्। अधिगोप ङि इत्यवस्थायां 'तृतीयासप्तम्योर्बहुलम्' इति विकल्पेन अम्भावे पूर्वरूपे च अधिगोपम्। अमः अभावे अधिगोप ङि। अनुबन्धलेपे अधि गोप इ। गुणे अधिगोपे इति।

कृष्णस्य समीपम् उपकृष्णम्। कृष्ण ङस् उप इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति'- इत्यादिना सूत्रेण समासः। समीपार्थे उप इत्यव्ययम्।

समासत्वात् सुपः लुक्। उप इत्यस्योपसर्जनसंज्ञायां पूर्वप्रयोगे उपकृष्ण। तस्मात् सुप्रत्यये 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' इति सूत्रेण अमादेशे उपकृष्ण अम्। पूर्वरूपे उपकृष्णम् इति रूपम्।

मद्राणां समृद्धिः सुमद्रम्। मद्र आम् सु इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति-' इत्यादिना समृद्धि इत्यर्थे सु इत्यव्ययं मद्राणामित्यनेन समस्यते। सुपो धातुरिति सुलोपे मद्र सु। सु इत्यस्योपसर्जनसंज्ञायां पूर्वप्रयोगे सुमुद्र। तस्मात्सुपि 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' इति अम्भावे पूर्वरूपे च सुमद्रम्।

यवनानां व्यृद्धिः दुर्यवनम्। व्यृद्धिः इत्यस्य ऐश्वर्याभावः इत्यर्थः। यवन आम् दुर् इत्यलौकिकविग्रहः। अव्ययं विभक्ति...... इत्यादिना समासे व्यर्द्धिरित्यर्थे दुर् इत्यव्ययं यवनानामित्यनेन समस्यते। दुर् इत्यस्योपसर्जनसंज्ञायां पूर्वप्रयोगे दुर् यवन। तस्मात्सुपि अमि पूर्वरूपे च दुर्यवनम्।

मक्षिकाणामभावः निर्मक्षिकम्। मक्षिक आम् निर् इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति......' इत्यादिना समासः। पूर्वनिपाते निर् मक्षिक आम्। सुपोधातुरिति आमो लुकि निरः प्राक्प्रयोगे निर्मक्षिक। सोरमि पूर्वरूपे निर्मक्षिकम्।

हिमस्यात्ययः अतिहिमम्। अत्ययः ध्वंसः। हिम ङस् अति। 'अव्ययं विभक्ति'- इत्यादिना समासे अत्ययार्थे अति इत्यव्ययञ्च। अति इत्यस्य पूर्वप्रयोगे सुपो लुकि अतिहिम। सुपः अमि पूर्वरूपे अतिहिमम्।

निद्रा सम्प्रति न युज्यते इत्यतिद्रम्। सम्प्रति न युज्यते इत्यर्थे अति इत्यव्ययम्। निद्रा सु अति इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति'- इत्यादिना समासः। अतीत्यस्य पूर्वप्रयोगे सुपः लुकि च अतिनिद्रा। 'अव्ययीभावश्च' इति नपुंसकत्वे 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे अतिनिद्र। तस्मात्सौ पूर्वरूपे च अतिनिद्रम् इति रूपम्।

> **'नलोपः प्रातिपदिकान्तस्य'**
>
> प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नस्य लोपः स्यात्।

हरिशब्दस्य प्रकाशः इतिहरि। शब्दप्रादुर्भावस्योदाहरणमिदम्। हरि ङस् इति इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति' - इत्यादिना सूत्रेण समासे प्रकाश इत्यर्थे इति । इति इत्यस्य उपसर्जनत्वे पूर्वप्रयोगे सुपः लुकि च इति हरि। तस्मत्सौ 'अव्ययादाप्सुपः' इति लुकि च इतिहरि इति रूपम्।

यथा इत्यव्ययस्य चत्वारः अर्थाः सन्ति। ते योग्यता, वीप्सा, पदार्थानतिवृत्ति, सादृश्यं च। रूपस्य योग्यम् अनुरूपम्। योग्यतार्थे अनुः। रूप ङस् अनु इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति.....' इत्यादिना समासः। अनोः उपसर्जनत्वे पूर्वप्रयोगः। सुपः लुकि अनुरूप। तस्मात्सुपि अमादेशे पूर्वरूपे च अनुरूपम् इति। यथारूपम् यथावयवम् इत्यपि।

अर्थमर्थं प्रत्यर्थम्। वीप्सायां द्विरुक्तिः। पूर्णतायाः व्याप्तिः वीप्सा। अर्थ अम् प्रति इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति....' इत्यादिना समासे वीप्सायां प्रतीत्यव्ययं च। प्रतीत्यस्य उपसर्जनत्वे पूर्वप्रयोगः। सुपः लुकि प्रति अर्थ। 'इको यणचि' इति यणि प्रत्यर्थ। तस्मात्सुपि अमि पूर्वरूपे च प्रत्यर्थम् इति रूपम्।

*शक्तिमनतिक्रम्य यथाशक्ति। शक्ति अम् यथा इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति–' इत्यादिना समासे अनतिक्रम्येत्यर्थे यथा इत्यव्ययञ्च। यथेत्यस्योपसर्जनत्वे पूर्वप्रयोगे सुलोपे च यथाशक्ति। पुनः प्रातिपदिकत्वात् प्रथमैकवचने सु प्रत्यये 'अव्ययादाप्सुपः' इति सोर्लुकि यथाशक्ति इति रूपम्।*

**सूत्रम् - अव्ययीभावे चाकाले। ६।३।८१।**

सहस्य सः स्यादव्ययीभावे न तु काले।

**टिप्पणिः-** अव्ययीभावे च अकाले इति त्रिपदं सूत्रम्। अनेन सूत्रेण सहेत्यव्ययस्य सादेशः विधीयते। सहस्य स इत्यादेशः स्याद् अव्ययीभावे न तु काले।

*हरेः सादृश्यं सहरि। हरि ङस् सह इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति' इत्यादिना समासे सादृश्यमित्यर्थे सहेत्यव्ययञ्च। सहेत्यस्योपसर्जनसंज्ञायां पूर्वप्रयोगे सुपः लुकि च सह हरि। अत्र 'अव्ययीभावे चाकाले' इति सूत्रेण सहस्य सादेशे विभक्तिकार्ये सहरि इति रूपम्।*

*ज्येष्ठस्यानुपूर्व्येण अनुज्येष्ठम्। ज्येष्ठ ङस् अनु इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति...' इत्यादिना समासः आनुपूर्व्येण इत्यर्थे अनु इत्यव्ययञ्च। अनोरुपसर्जनत्वे पूर्वप्रयोगः। सुपः लुकि अनुज्येष्ठ। तस्मात्सौ 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' इत्यमि पूर्वरूपे च अनुज्येष्ठम् इति रूपम्।*

*चक्रेण युगपद् सचक्रम्। चक्र टा सह इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति -' इत्यादिना समासे यौगपद्यार्थे सह इत्यव्ययञ्च। सहस्योपसर्जनत्वे पूर्वप्रयोगः। सुपः लुकि सहचक्र। 'अव्ययीभावे चाकाले' इति सहस्य सादेशे सचक्र । विभक्तिकार्ये सचक्रम्।*

*सदृशः सख्या ससखि। सह सखि टा इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति-' इत्यादिना समासे सादृश्यार्थे सह इत्यव्ययञ्च। सुपः लुकि 'अव्ययीभावे चाकाले' इति सादेशे ससखि । विभक्तिकार्ये ससखि इति रूपम्।*

*क्षत्राणां सम्पत्तिः सक्षत्रम्। सम्पत्तिः अनुरूपस्वात्मभावः। क्षत्र आम् सह इत्यलौकिकः विग्रहः। 'अव्ययं विभक्ति....' इत्यादिना समासे सम्पत्यर्थे सह इत्यव्ययञ्च। सहस्योपसर्जनत्वे पूर्वप्रयोगे सुलोपे सहक्षत्र। सादेशे विभक्तिकार्ये सक्षत्रम्।*

*तृणमपरित्यज्य सतृणम्। साकल्यार्थे (अपरित्यज्य) सह इत्यव्ययम्। तृण अम् सह इत्यलौकिकविग्रहः। अव्ययं विभक्ति.... इत्यादिना समासः साकल्यार्थे सहेत्यव्ययञ्च । सहस्योपसर्जनत्वे पूर्वप्रयोगः। सुपः लुक्। सहस्य सादेशे सतृण। विभक्तिकार्ये सतृणम् इति रूपम्।*

*अग्निग्रन्थपर्यन्तमधीते साग्नि। अग्नि अम् सह इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति...' इत्यादिना समासे अन्तार्थे सह इत्यव्ययञ्च। सहस्योपसर्जनत्वे पूर्वप्रयोगः। सुपः लुकि सह अग्नि। सहस्य सादेशे 'अकः सवर्णे दीर्घः' इति दीर्घे च साग्नि । विभक्तिकार्ये साग्नि इति रूपम्।*

**सूत्रम् - नदीभिश्च २।१।२०।।**

नदीभिः सह संख्या समस्यते।

**टिप्पणिः** - द्विपदं सूत्रम्। अनेन सूत्रेण संख्या नदीवाचकैः शब्दैः साकं समस्यते सोऽव्ययीभावः इत्युच्यते।

**वार्तिकम्- समाहारे चायमिष्यते।**

अयं समासः (संख्या नदीवाचकैः सह समस्यते इति) समाहारार्थे एव प्रयुज्यते।

*पञ्चानां गङ्गानां समाहारः पञ्चगङ्गम्। पञ्चन् आम् गङ्गा आम् इत्यलौकिकविग्रहः। 'नदीभिश्च' इति समासः। समाहारे चायमिष्यते इति वार्तिकबलात् समाहारार्थे समासः। संख्यावाचकस्य पञ्चन्शब्दस्य 'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्युपसर्जनसंज्ञायाम् उपसर्जनं पूर्वम् इति पूर्वप्रयोगः। सुपः लुकि पञ्चन् गङ्गा। 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे पञ्चगङ्गा। 'अव्ययीभावश्च' इति नपुंसकत्वे ह्रस्वे नपुंसके प्रातिपदिकस्य इति ह्रस्वे पञ्चगङ्ग। विभक्तिकार्ये पञ्चगङ्गम्।*

*द्वयोः यमुनयोः समाहारः द्वियमुनम्। द्वि ओस् यमुना ओस् इति अलौकिकविग्रहः। 'नदीभिश्च' इति सूत्रेण समासे सुपः लुकि च द्वियमुना। 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे द्वियमुन। द्विविभक्तिकार्ये द्वियमुनम् इति रूपम्।*

**सूत्रम्- तद्धिताः ४।२।७६।।**

आपञ्चमसमाप्तेरधिकारोऽयम्।

टिप्पणिः- पञ्चमाध्यायसमाप्तिपर्यन्तं तद्धितः इति पदमनुवर्तते।

**सूत्रम्- अव्ययीभावे शरत्प्रभृतिभ्यः ५।४।१०७।।**

शरदादिभ्यष्टच् स्यात्समासान्तोऽव्ययीभावे।

**टिप्पणिः–** द्विपदं सूत्रम्। अनेन सूत्रेण टच्प्रत्ययः विधीयते। शरदादिभ्यः शब्देभ्यः टच्प्रत्ययः स्यात् समासान्तोऽव्ययीभावे ।

*शरदः समीपम् उपशरदम्। शरद् ङस् उप इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति...' इत्यादिना समासः। समीपार्थे उपेत्यव्ययञ्च। उपेत्यस्योपसर्जनत्वे पूर्वप्रयोगः। सुपो लुकि उपशरद्। अत्र 'अव्ययीभावे शरत्प्रभृतिभ्यः' इति सूत्रेण टच्प्रत्ययः। टचि टचौ इतौ। तयोः लुक्। उपशरद् अ (उपशरद) । विभक्तिकार्ये उपशरदम्।*

*शरदादिगणे विपाश् जरा इत्यादयः शब्दाः अन्तर्भवन्ति। विपाशं प्रति प्रतिविपाशम्। विपाश् अम् प्रति इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति...' इत्यादिना समासः। समासत्वात् सुलोपः। प्रति इत्यस्य पूर्वनिपाते प्रतिविपाश्। 'अत्र अव्ययीभावे शरत्प्रभृतिभ्यः' इति टच्प्रत्यये प्रतिविपाश। विभक्तिकार्ये प्रतिविपाशम्।*

**जराया जरश्च।** गणसूत्रमिदम्। जराशब्दस्य जरसादेसः टच् प्रत्ययश्च स्यात् अव्ययीभावसमासे ।

*जरायाः समीपमुपजरसम्। जरा ङस् उप इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति...' इति सूत्रेण समासः समीपार्थे उपेत्यव्ययञ्च। उपेत्यस्य पूर्वप्रयोगे सुपो लुकि च उपजरा। अत्र 'जरायाः जरश्च' इति टच्प्रत्यये जराशब्दस्य जरसादेशे च उपसरस। विभक्तिकार्ये उपजरसम्।*

**सूत्रम्-** **अनश्च ५।४।१०८।**

अन्नन्तादव्ययीभावाट्टच् स्यात्।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण टच्प्रत्ययः विधीयते। अन्नन्तात् अव्ययीभावाद् टच् स्यात्।

*राज्ञः समीपमुपराजम्। राजन् ङस् उप इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति....' इत्यादिना समासः। समीपार्थे उपेत्यव्ययञ्च। उपेत्यस्य पूर्वप्रयोगः। समासत्वात् सुपो लुकि उपराजन्। अत्र 'अनश्च' इति सूत्रेण टच्प्रत्यये उपराजन् अ। 'नस्तद्धिते' इति टिलोपे 'नाव्ययीभावाद्....' इति अमि अमि पूर्वः इति पूर्वरूपे उपराजम्।*

**सूत्रम्- नस्तद्धिते ६।४।१४४।**

नान्तस्य भस्य टेर्लोपः स्यात् तद्धिते।

टिप्पणिः नः तद्धिते इति द्विपदं सूत्रम्। भस्य टेः लोपः इति पदानि अनुवर्तन्ते। अनेन सूत्रेण टिलोपः विधीयते। नान्तस्य भस्य टेर्लोपः स्यात् तद्धिते।

*उपराजन् अ इत्यत्र टच् इति तद्धितप्रत्ययः परत्वेन वर्तमानत्वात् 'नस्तद्धिते' इत्यनेन टेः अनः लोपे उपराज् अ। विभक्तिकार्ये उपराजम् इति। एवम् अध्यात्मम्। आत्मनि इति अध्यात्मम्। आत्मन् ङि अधि इत्यलौकिकविग्रहः।*

**सूत्रम्- नपुंसकादन्यतरस्याम् ।५।४।१०१।**

अन्नन्तं यत् क्लीबं तदन्तादव्ययीभावाद् टच् वा स्यात्।

**टिप्पणिः-** द्विपदं सूत्रम्। अतः अव्ययीभावाद् टच् समासान्तः तद्धितः इत्येतानि पदानि अनुवर्तन्ते। अनेन सूत्रेण विकल्पेन टच्प्रत्ययः विधीयते। अन्नन्तं यत् क्लीबं तदन्तादव्ययीभावाद् टच् वा स्यात्।

*चर्मणः समीपम् उपचर्मम् उपचर्म वा । चर्मन् शब्दः अन्नन्तं क्लीबं भवति। चर्मन् ङस् उप इत्यलौकिकविग्रहः । 'अव्ययं विभक्ति...' इत्यादिना समासः समीपार्थे उपेत्यव्ययञ्च। उपेत्यस्य पूर्वप्रयोगः। सुपो लुकि उपचर्मन्। अत्र 'नपुंसकादन्यतरस्याम्' इति विकल्पेन टचि उपचर्मन् अ। नस्तद्धिते इति टिलोपे उपचर्म। 'अव्ययादाप्सुपः' इति सुलोपः।*

**सूत्रम्- झयः ५-४-१११**

झयन्तादव्ययीभावाद् टज्वा स्यात्।

**टिप्पणिः-** एकपदं सूत्रम्। अनेन सूत्रेण टच् विकल्पेन विधीयते।

*समिधः समीपम् उपसमिधम् उपसमित् वा । समिध् ङस् उप इत्यलौकिकविग्रहः। 'अव्ययं विभक्ति-' इत्यादिना समासे समीपार्थे उप इत्यव्ययञ्च। उप इत्यस्य पूर्वप्रयोगः। सुपो लुकि उपसमिध्। अत्र 'झयः' इति सूत्रेण टच्प्रत्यये उपसमिध् अ। विभक्तिकार्ये उपसमिधम्। टचः अभावे उपसमिध्। तस्मात्सुप्रत्यये 'अव्ययादाप्सुपः' इति सुलोपः। वावसाने इति सूत्रेण विकल्पेन चर्त्वे उपसमित्।*

इत्यव्ययीभावसमासः



## पठनप्रवर्तनानि

**I कोष्ठात्समुचितमुत्तरं निर्धार्य लिखत-**

१. विभक्त्यर्थे अव्ययीभावसमासं विधीयमानस्य सूत्रस्य उदाहरणं किम्?

(अधिहरि, उपकृष्णम्, सुमद्रम्)

२. क्षत्राणां सम्पत्तिः——— ।

(सतृणम्, सक्षत्रम्, साग्नि)

३. प्रातिपदिकसंज्ञाविधायकं सूत्रं——— भवति।

(अव्ययं विभक्ति...., उपसर्जनं पूर्वम्, कृत्तद्धितसमासाश्च)

४. प्रथमानिर्दिष्टं समास ———।

(उपसर्जनम्, पूर्वरूपम्, पररूपम्)

५.  अव्ययीभावश्च इति सूत्रेण किं विधीयते?

(अव्ययीभावसमासः, नपुंसकत्वम्, अव्ययत्वम्)

६.  नाव्ययीभावादतोऽम्त्वपञ्चम्याः इति सूत्रेण किं विधीयते?

(अव्ययीभावसमासः, अमादेशः, पञ्चमीविभक्तिः)

## II. सूत्राणि व्याख्यात-

१. उपसर्जनं पूर्वम्।

२. अव्ययीभावे चाकाले।

३. नदीभिश्च।

४. तृतीयासप्तम्योर्बहुलम्।

## III. उत्तरत-

१. अधिगोपम्, अधिगोपे इति रूपद्वयं कथं सिद्ध्यति?

२. यथार्थाः के? विशदयत।

३. उपसमिधम् उपसमित् इति रूपद्वयं कथम्?

४. समाहारे चायमिष्यते इत्यस्य कोऽर्थः?

## IV. सप्रमाणं समस्यत

१. दुर्यवनम्।

२. निर्मक्षिकम्।

३. इतिहरि।

४. यथाशक्ति।

५. सचक्रम्।

## V. यथोचितं योजयत

| क | | ख | |
|---|---|---|---|
| १. | अव्ययीभावे शरत्प्रभृतिभ्यः | १. | टिलोपः |
| २. | नस्तद्धिते | २. | सादेशः |
| ३. | झयः | ३. | टच्प्रत्ययः |
| ४. | अव्ययीभावे चाकाले | ४. | टज्वा |
| | | ५. | उपसर्जनम्। |

# अधिकविस्तरः
# अव्ययीभावसमासः

अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाययथानुपूर्व्य-यौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु इति सूत्रेण समासः विधीयते।

| अर्थः | समस्तं रूपम् | विग्रहः |
|---|---|---|
| विभक्तिः | अधिहरि | हरौ इति |
| समीपम् | उपकृष्णम् | कृष्णस्य समीपम्। |
| समृद्धिः | सुमद्रम् | मद्राणां समृद्धिः। |
| व्यृद्धिः | दुर्यवनम् | यवनानां व्यर्द्धिः। |
| अभावः | निर्मक्षिकम् | मक्षिकाणाम् अभावः। |
| अत्ययः (ध्वंसः) | अतिहिमम् | हिमस्य अत्ययः। |
| असम्प्रति (सम्प्रति न युज्यते इति) | अतिनिद्रम् | निद्रा सम्प्रति न युज्यते इति |
| शब्दप्रादुर्भावः (प्रकाशः) | इतिहरि | हरिशब्दस्य प्रकाशः। |
| पश्चात् | अनुविष्णु | विष्णोः पश्चात् |
| यथार्थाः चत्वारः-योग्यता | रूपस्य योग्यम् | अनुरूपम् |
| वीप्सा (पूर्णतायाः व्याप्तिः) | प्रत्यर्थम् | अर्थम् अर्थं प्रति। |
| अनतिक्रम्य (पदार्थानतिवृत्ति) | यथाशक्ति | शक्तिम् अनतिक्रम्य |
| सादृश्यम् | सहरि | हरेः सादृश्यम्। |
| आनुपूर्व्यम् | अनुज्येष्ठम् | ज्येष्ठस्यानुपूर्व्येण। |
| यौगपद्यं (युगपत्) | सचक्रम् | चक्रेण युगपत्। |
| सम्पत्तिः | सक्षत्रम् | क्षत्राणां सम्पत्तिः। |
| साकल्यम् (अपरित्यज्य) | सतृणम् | तृणमपि अपरित्यज्य |
| अन्तम् | साग्नि | अग्निग्रन्थपर्यन्तम्। |

अथ समासप्रकरणम्



१.४

## चतुर्थः पाठः

# तत्पुरुषसमासः

**सूत्रम्- तत्पुरुषः २।१।२२।।**

अधिकारोऽयं प्राक् बहुव्रीहेः।

**टिप्पणिः-** बहुव्रीहिसमासं यावत् तत्पुरुषः इति पदमनुवर्तते।

**सूत्रम्- द्विगुश्च २।१।२३।।**

द्विगुरपि तत्पुरुषसंज्ञकः स्यात्।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण द्विगोः तत्पुरुषसंज्ञा विधीयते। 'संख्यापूर्वो द्विगुः' इति सूत्रेण द्विगुसंज्ञा विधीयते।

**सूत्रम्- द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः।२।१।२४।।**

द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समस्यते स च तत्पुरुषः।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण द्वितीयातत्पुरुषसमासः विधीयते।

*कृष्णं श्रितः कृष्णश्रितः। कृ ष्ण अम् श्रित सु इत्यलौकिकविग्रहः। 'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' इति सूत्रेण समासः। समासत्वात् प्रातिपदिकसंज्ञायां तदवयवस्य सुपः लुकि कृष्णश्रित। तस्मात्सुपि अनुबन्धलोपे रुत्वे विसर्गे च कृष्णश्रितः इति रूपम्।*

**सूत्रम्- तृतीया तत्कृतार्थेन गुणवचनेन २.२.१२०।**

तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेन अर्थशब्देन च वा समस्यते सः तत्पुरुषः।

**टिप्पणिः-** तृतीया, तत्कृतार्थेन , गुणवचनेन इति त्रिपदं सूत्रम्। अनेन सूत्रेण तृतियातत्पुरुषः विधीयते। तत्कृत इति तत्कृतेन इत्यस्य लुप्तविभक्तिकं रूपम्। तृतीयान्तं पदं 'तृतीयान्तार्थकृतगुणवचनेन' अर्थशब्देन च सह वा समस्यते सः तत्पुरुषः।

*शङ्खुलया खण्डः शङ्खुलाखण्डः। शङ्कुला टा खण्ड सु इत्यलौकिकविग्रहः। 'तृतीया तत्कृतार्थेन गुणवचनेन' इति समासः। समासत्वात् प्रातिपदिकत्वेन सुपो लुक्। विभक्तिकार्ये शङ्खुलाखण्डः।*

*धान्येन अर्थः धान्यार्थः। धान्य टा अर्थ सु इत्यलौकिकविग्रहः। 'तृतीया तत्कृतार्थेन गुणचनेन' इति सूत्रेण समासे सुपः लुकि धान्य अर्थ। 'अकः सवर्णे दीर्घः' इति सवर्णदीर्घे विभक्तिकार्ये धान्यार्थः।*

तत्कृत इति किम्? तृतीयान्तकृतेन इत्यर्थः। तृतीयान्तपदस्य अर्थेन कृतः भवेत्। यथा- अक्ष्णा काणः इत्यत्र काणत्वं तृतीयान्तार्थकृतेन न भवति। अतोऽत्र न समासः।

**सूत्रम्-** **कर्तृकरणे कृता बहुलम्।२.२.३२।**

कर्तरि करणे च तृतीया कृदन्तेन बहुलं समस्यते।

**टिप्पणिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण विकल्पेन कृदन्तेन सह तृतीयातत्पुरुषसमासः विधीयते। कर्तरि करणे च तृतीया कृदन्तेन बहुलं समस्यते सः तत्पुरुषः।

*हरिणा त्रातः हरित्रातः। हरि टा त्रात सु इत्यलौकिकविग्रहः। त्रात इति कृदन्तं रूपम्। 'कर्तृकरणे कृता बहुलम्' इति सूत्रेण समासः। समासत्वात् सुपो लुकि हरित्रात। विभक्तिकार्ये हरित्रातः इति रूपम्।*

**परिभाषा- कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्।**

कृदन्तस्य ग्रहणे गतिपूर्वस्य कारकपूर्वस्य च कृतः अपि ग्रहणं कार्यम्।

**टिप्पणिः-** कृदन्तस्य इत्युच्यते चेत् न केवलकृतः किन्तु गतिपूर्वस्य कृतः, कारकपूर्वस्य कृतः च ग्रहणं कार्यम्।

*नखैः निर्भिन्नः नखनिर्भिन्नः इत्यत्र 'कर्तृकरणे कृता बहुलम्' इति सूत्रेण करणार्थे वर्तमानेन नखशब्देन साकं निर्भिन्नः इति गतिपूर्वकेण कृदन्तेन समासः। तेन नखनिर्भिन्नः इति रूपम्।*

**सूत्रम्- चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः २-२-३६।**

चतुर्थ्यन्तार्थाय यत् तद्वाचिना अर्थादिभिश्च चतुर्थ्यन्तं वा समस्यते।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण चतुर्थीतत्पुरुषः विधीयते। चतुर्थ्यन्तं तदर्थ (चतुर्थ्यर्थ)- अर्थ- बलि- हित- सुख -रक्षित शब्दैः वा समस्यते।

*यूपाय दारु यूपदारु। यूप ङे दारु सु इत्यलौकिकविग्रहः। 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः' इति सूत्रेण समासः। समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुक्। पुनः सुः। दारुशब्दस्य नपुंसकत्वात् 'स्वमोर्नपुंसकात्' इति सुलोपे यूपदारु।*

**तदर्थेन प्रकृतिविकृतिभाव एवेष्टः।**

**टिप्पणिः-** चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः इति सूत्रे तदर्थ इत्यनेन प्रकृतिविकृतिभाव एव गृह्यते। यूपाय दारु इत्यत्र यूपः विकृतिः (कार्यं) दारु प्रकृतिः (उपादानकारणम्)। किन्तु रन्धनाय स्थाली इत्यत्र पाचकार्थमुपयुक्तां स्थालीं विवक्षते। अत्र स्थाल्याः विकृतित्वाभावात् न समासः। एवम् अश्वाय घासः इत्यत्रापि घासस्य प्रकृतित्वाभावात् न समासः।

**वार्तिकम्- अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्।**

अर्थशब्दः चतुर्थ्यन्तशब्देन नित्यं समस्यते। तदा विशेष्यस्य लिङ्गमेव समस्तपदस्य भवेत्।

**टिप्पणिः-** ‘चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः’ इति सूत्रेण विकल्पेनैव चतुर्थीतत्पुरुषसमासः । किन्तु अनेन वार्तिकेन नित्यसमासः (अर्थशब्देन चतुर्थ्यन्तं समस्यते चेत्) अपि च तदानीं परपदस्य लिङ्गं न स्यात्. किन्तु विशेषस्य लिङ्गं स्यादेव।

*द्विजार्थः सूपः, द्विजार्था यवागूः, द्विजार्थं पयः। द्विजाय अयं द्विजार्थः। द्विज ङे अर्थ सु इत्यलौकिकविग्रहः। ‘चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः’ इति समासः। समासत्वात्सुपो लुक् । समर्णदीर्घे द्विजार्थ। तस्मात्सौ द्विजार्थ सु। सूपः इति विशेष्यस्य पुलिङ्गत्वात् विभक्तिकार्ये द्विजार्थः।*

*द्विजाय इयं द्विजार्था। द्विजाय इदं द्विजार्थम्। परवल्लिङ्गमित्यस्य अपवादः। भूताय बलिः भूतबलिः । भूत ङे बलि सु इत्यलौकिकविग्रहः। ‘चतुर्थी तदर्थार्थाबलिहितसुखरक्षितैः’ इति समासः। सुपो लुकि भूतबलि। विभक्तिकार्ये भूतबलिः।*

*गोभ्यः हितं गोहितम्। गो भ्यस् हित सु इत्यलौकिकविग्रहः। ‘चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः’ इति समासे सुपो लुकि च गोहित। तस्मात्सुप्। नपुंसकात्वात् (परपदस्य) ‘अतोऽम’ इत्यमि गोहित अम् । अमि पूर्वः इति पूर्वरूपे गोहितम्।*

*गवे सुखं गोसुखम्। गवे हितं गोहितम्। गवे रक्षितं गोरक्षितम्।*

**सूत्रम्- पञ्चमी भयेन ३।२।३७।**

पञ्चम्यन्तं सुबन्तं भयप्रकृतिकेन सुबन्तेन सह वा समस्यते।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण पञ्चमीतत्पुरुषसमासः विधीयते। पञ्चम्यन्तं पदं भयेन सह वा समस्यते।

*चोराद् भयं चोरभयम्। चोर ङसि भय सु इत्यलौकिकविग्रहः। 'पञ्चमी भयेन' इति समासः.। समासत्वात् सुपो लुक् । विभक्तिकार्ये चोरभयम्।*

**सूत्रम् - स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन २-२-३६।**

स्तोकम् अन्तिकं दूरम् इत्येषामर्थे विद्यमानं पञ्चम्यन्तं कृच्छ्रप्रकृतिपञ्चम्यन्तं च क्तान्तैः सह वा समस्यते स च तत्पुरुषः।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण पञ्चम्यन्तानां कृच्छ्रस्य च क्तान्तेन सह समासः।

*स्तोकाद् मुक्तः स्तोकान्मुक्तः। स्तोक ङसि मुक्त सु इत्यलौकिकविग्रहः। 'स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन' इति समासः।*

**सूत्रम्- पञ्चम्याः स्तोकादिभ्यः ।६-३२१।**

स्तोकादिभ्यः शब्देभ्यः परस्य पञ्चम्या अलुक् स्यादुत्तरपदे।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण पञ्चम्या अलुक् विधीयते। 'सुपो धातुप्रातिपदिकयोः' इत्यस्यापवादः।

*स्तोकाद् मुक्तः स्तोकान्मुक्तः। स्तोक ङसि मुक्त सु इत्यलौकिकविग्रहः। 'स्तोकान्तिकदूरार्थकृच्छ्रणि क्तेन' इति समासः। अत्र पञ्चम्याः स्तोकादिभ्यः इति पञ्चम्या अलुक्। स्तोकाद् मुक्त। 'यरोऽनुनासिकेऽनुनासिको वा' इत्यनुनासिके स्तोकान्मुक्त। विभक्तिकार्ये स्तोकान्मुक्तः। एवम् अन्तिकादगतः अभ्यशादागतः दूरादागतः कृच्छ्रादागतः इत्यादिः। अभ्याशं समीपम्।*

**सूत्रम्- षष्ठी २.२.८।**

षष्ठ्यन्तं सुबन्तं सुबन्तेन सह वा समस्यते।

**टिप्पणिः-** एकपदं सूत्रम्। अनेन सूत्रेण षष्ठीतत्पुरुषसमासः विधियते। षष्ठ्यन्तं सुबन्तं सुबन्तेन सह वा समस्यते।

*राज्ञः पुरुषः राजपुरुषः । राजन् ङस् पुरुष सु इत्यलौकिकविग्रहः। 'षष्ठी' इति सूत्रेण समासः। समासात्वात् सुपो धातुप्रातिपदिकयोः इति सुपः लुक्। राजन् पुरुष। 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे राजपुरुष। विभक्तिकार्ये राजपुरुषः इति रूपम्।*

**सूत्रम्- पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे २.२.१।**

अवयविना सह पूर्वादयः समस्यन्ते एकत्वसंख्याविशिष्टश्चेदवयवी।

**टिप्पणिः-** पूर्वापराधरोत्तरम् एकदेशिना एकाधिकरणे इति त्रिपदं सूत्रम्। अनेन सूत्रेण पूर्वादीनां समासः विधीयते। अवयविना सह पूर्व- अपर- अधर- उत्तरशब्दाः समस्यन्ते एकत्वसंख्याविशिष्टः चेद् अवयवी। 'षष्ठी' इत्यस्यापवादोऽयम्।

*पूर्वं कायस्य पूर्वकायः। पूर्व अम् काय ङस् इत्यलौकिकविग्रहः। पूर्वादीनां प्रथमानिर्दिष्टत्वादुपसर्जनासंज्ञायां प्राक् प्रयोगः। 'पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे' इति सूत्रेण समासः। समासत्वात् सुपो लुक्। पूर्वकाय। विभक्तिकार्ये पूर्वकायः।*

एवम् अपरकायः। अपरं कायस्य अपरकायः। एकाधिकरणे इति किम्? अवयवी एकश्चेद् अयं समासः। तेन पूर्वः छात्राणाम् इत्यत्र एकाधिकरणत्वाभावात् न समासः। अत्र सूत्रे अधिकरणशब्दः द्रव्यवाची।

**सूत्रम्- अर्धं नपुंसकम् २-२-२।**

समांशवाच्यर्थशब्दो नित्यं क्लीबे सः समस्यते।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण अर्धशब्दः समस्यते। समांशवाच्यर्धशब्दो नित्यं क्लीबे, सः समस्यते। समांशभिन्नेऽर्थे वर्तमानः अर्धशब्दः पुल्लिङ्गे।

*अर्धं पिप्पल्याः अर्धपिप्पली। अर्ध सु पिप्पली ङस् इत्यलौकिकविग्रहः। 'अर्धं नपुंसकम्' इति सूत्रेण समासः। अर्धशब्दस्य प्रथमानिर्दिष्ठत्वादुपसर्जनत्वात्पूर्वनिपातः। समासत्वात् सुपो लुक्। अर्धपिप्पली। तस्मात्सुः। अनुबन्धलोपे 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सुलोपे अर्धपिप्पली इति रूपम्।*

समांशवाचि अर्धशब्दः सुबन्तः अवयववाचिना वा समस्यते। एकत्वसंख्याविशिष्टश्चेदयावयवी इति सूत्रार्थस्य निष्कर्षः। तेन अर्धपिप्पलीनाम् इत्यत्र न समासः। अवयविनां बहुत्वात्।

**सूत्रम्- सप्तमी शौण्डैः २-२-४०।**

सप्तम्यन्तं शौण्डादिभिः सह वा समस्यते।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण सप्तमीतत्पुरुषसमासः विधीयते। सह, सुपा, समासः, विभाषा, तत्पुरुषः इत्यनुवर्तन्ते। सप्तम्यन्तं सुबन्तं शौण्डादिभिः सह विकल्पेन समस्यते।

*अक्षेषु शौण्डः अक्षशौण्डः। अक्ष सुप् शौण्ड सु इत्यलौकिकविग्रहः। 'सप्तमी शौण्डैः' इति समासः। सप्तम्यन्तस्योपसर्जनत्वात्पूर्वनिपातः। सुपो लुक्। अक्षशौण्ड। विभक्तिकार्ये अक्षशौण्डः।*

द्वितीयातृतीयेत्यादियोगविभागादन्यत्रापि तृतीयादिविभक्तीनां प्रयोगवशात् समासो ज्ञेयः। द्वितीया श्रितातीतपतितगता-त्यस्तप्राप्तापन्नैः, तृतीया तत्कृतार्थेन गुणवचनेन, चतुर्थी तादर्थ्यार्थबलिहितसुखरक्षितैः. पञ्चमी भयेन, सप्तमी शौण्डैः इति पञ्चसु सूत्रेषु योगविभागः कार्यः। द्वितीया इत्येकं सूत्रम्। द्वितीयान्तं समर्थैः सह समस्यते इत्यर्थः। श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः इति द्वितीयं सूत्रम्। द्वितीयान्तं पदं श्रितातीतादिपदैः साकं समस्येत इत्यर्थः। एवं तेषां पञ्चानां सूत्राणां योगविभागेन समासः विधीयते। शिष्टप्रयोगाणां साधुत्वस्थापनायैव योगविभागः।

**सूत्रम्- दिक्संख्ये संज्ञायाम् २-१-५०।**

दिग्वाचकः संख्यावाचकः च शब्दः समानाधिकरणेन सुबन्तेन सह समस्यते संज्ञायाम्।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण दिक्संख्ये संज्ञायां समस्यते। दिक्वाचकः संख्यावाचकश्च शब्दः समानाधिकरणेन सुबन्तेन सह समस्यते संज्ञायाम्।

*पूर्वा चासौ इषुकामशमी च पूर्वेषुकामशमी। कस्यचन देशस्य नामेदम्। पूर्वा सु इषुकामशमी सु इत्यलौकिकविग्रहः। 'दिक्संख्ये संज्ञायाम्' इति समासः। समासत्वात् सुपो लुक्। गुणे विभक्तिकार्ये पूर्वेषुकामशमी इति रूपम्। दिक्संख्ययोः प्रथमानिर्दिष्टत्वात् उपसर्जनत्वेन प्राक् प्रयोगः।*

*सप्त च ते ऋषयः च सप्तर्षयः। सप्तन् जस् ऋषि जस् इत्यलौकिकविग्रहः। 'दिक्संख्ये संज्ञायाम्' इति समासः। समासत्वात् सुपो लुक्। सप्तन् ऋषि। 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे सप्तऋषि। गुणे उरण् रपरः इति रपरत्वे च सप्तर्षि। तस्मात् प्रथमाबहुवचनप्रत्यये सप्तर्षि*

*जस्। 'जसि च' इति गुणे सप्तर्षे जस्। अनुबन्धलोपे सप्तर्षे अस्। 'एचोऽयवायावः' इत्ययादेशे सप्तर्षयस्। रुत्वे विसर्गे च सप्तर्षयः।।*

संज्ञात्वाभावात् उत्तराः वृक्षाः, पञ्च ब्राह्मणाः इत्यादौ समासो न।

**सूत्रम्- तद्धितार्थोत्तरपदसमाहारे च २.१.५२।।**

तद्धितार्थे विषये उत्तरपदे परतः समाहारे च वाच्ये दिक्संख्ये वा समस्येते स तत्पुरुषः।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण दिक्संख्ये समस्येते। समानाधिकरणेन सुबन्तेन सहेति शेषः।

*पूर्वस्यां शालायां भव पौर्वशालः। पूर्वा ङि शाला ङि इत्यलौकिकविग्रहः। समासत्वात् सुपो लुक्। पूर्वा शाला।*

**वार्तिकम्- सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः।**

**टिप्पणिः-** 'सर्वनाम्नो वृत्तिमात्रे' (समासतद्धितादिवृत्तौ) पुंवद्भावः। त्रिपदं वार्तिकमिदम्। अनेन वार्तिकेन पुंवद्भावः विधीयते।

*पूर्वाशाला इत्यवस्थायां 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति वार्तिकेन सर्वनाम्नः पूर्वस्य पुंवद्भावे पूर्वशाला इति।*

**सूत्रम्- दिक्पूर्वपदादसंज्ञायां ञः ४.२.१०७।**

अस्मात् (दिक्पूर्वपदात्) भवाद्यर्थे ञः स्यादसंज्ञायाम्।

**टिप्पणिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण ञ इति तद्धितप्रत्ययो विधीयते। ञप्रत्यये अकारः शिष्यते। दिक्पूर्वपदात् भवाद्यर्थे अनेन सूत्रेण अप्रत्यये पूर्वशाला अ।

**सूत्रम्- तद्धितेष्वाचामादेः ७।२।११७।।**

जिति णिति च तद्धितेष्वचामादेरचो वृद्धिः स्यात्।

**टिप्पणिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण आदिवृद्धिः विधीयते। जिति णिति च तद्धिते परे अचां मध्ये आदेरचो वृद्धिः स्यात्।

*पूर्वशालाशब्दात् अप्रत्यये ञित्वादनेन 'तद्धितेष्वाचामादेः' इति सूत्रेण आदिवृद्धौ पौर्वशाला अ। 'यस्येति च' इति भस्याकारस्य लोपे पौर्वशाल् अ (पौर्वशाल)। तस्मात्सौ अनुबन्धलोपे रुत्वे विसर्गे च पौर्वशालः।*

**वार्तिकम्- द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्।**

**टिप्पणिः** उत्तरपदे परे द्वन्द्वसमासे तत्पुरुषसमासे च वर्तमानयोः पूर्वपदयोः नित्यसमास स्यात्। त्रिपदं वार्तिकम्। अनेन वार्तिकेन द्वन्द्वसमासे तत्पुरुषसमासे च वर्तमानयोः पदयोः उत्तरपदे परे नित्यसमासः विधीयते।

*पञ्च गावो धनं यस्य सः पञ्चगवधनः। पञ्चन् जस् गो जस् धन सु इत्यलौकिकविग्रहः। अत्र पञ्चन् जस् गो जस् इत्यत्र धनशब्दे परे 'द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्' इति वार्तिकेन नित्यसमासः। समासत्वात् सुपो लुक्। नलोपे च पञ्चगो धन सु। 'गोरऽतद्धितलुकि' इति पञ्चगो अ। अवादेशे पञ्चगव। पुनः पञ्चगवधनं यस्य सः इत्यवस्थायाम् 'अनेकमन्यपदार्थे' इति बहुव्रीहिसमासे विभक्तिकार्ये पञ्चगवधनः इति।*

**सूत्रम्- गोरऽतद्धितलुकि ५।४।८२।**

गोऽन्तात्तत्पुरुषाट्टच् स्यात् समासान्तो तद्धितलुकि।

**टिप्पणिः-** गोः अतद्धितलुकि इति द्विपदं सूत्रम्। अनेन सूत्रेण टच्प्रत्ययः विधीयते। टच् तद्धितः समासान्तः इति पदानि अनुवर्तन्ते। गोऽन्तात्तत्पुरुषाट्टच् स्यात् समासान्तः, न तु तद्धितलुकि। यत्र तद्धितप्रत्ययस्य लुक् प्राप्नोति तत्र समासान्तो न। टचि अकारः शिष्यते।

**सूत्रम्-** **तत्पुरुषः समानाधिकरणः कर्मधारयः १।२।४।**

समानाधिकरणः तत्पुरुषः कर्मधारयसंज्ञः स्यात्।

**टिप्पणिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण कर्मधारयसंज्ञा विधीयते। समाने अधिकरणे यस्य सः इति समानाधिकरणः। समानाधिकरणः तत्पुरुषः कर्मधारयसंज्ञं स्यात्। यथा नीलोत्पलम्।

**सूत्रम्-** **संख्यापूर्वो द्विगुः २।१।५२।।**

तद्धितार्थोत्तरपदसमाहारे च इति सूत्रे उक्तः त्रिविधः संख्यापूर्वो द्विगुसंज्ञः स्यात्।

**टिप्पणिः-** द्विपदं सूत्रम्। संख्या पूर्वः (अवयवः) यस्य सः संख्यापूर्वः। अनेन सूत्रेण द्विगुसंज्ञा विधीयते। तद्धितार्थे विषये उत्तरपदे परे समाहारे च वाच्ये संख्यापूर्वः द्विगुसंज्ञः स्यात्। यथा पञ्चगवम् इत्यत्र द्विगुसमासः। 'द्विगुरेकवचनम्' इत्यादावस्य प्रयोजनम्।

**सूत्रम्-** **द्विगुरेकवचनम् २।४।१।**

दिग्वर्थः समाहारः एकवत्स्यात्।

**टिप्पणिः** द्विपदं सूत्रम्। अनेन सूत्रेण एकवद्भावः विधीयते। समाहारार्थे द्विगुः एकवद्भवति।

*पञ्चानां गवां समाहारः पञ्चगवम्। पञ्चन् आम् गो आम् इत्यलौकिकविग्रहः। 'तद्धितार्थोत्तरपदसमाहारे च' इति समासः । समासत्वात् सुपो लुक्। नलोपे पञ्चगो। 'गोरतद्धितलुकि' इति टचि पञ्चगो अ। अवादेशे पञ्चगव । 'संख्यापूर्वो द्विगुः' इति द्विगुत्वे 'द्विगुरेकवचनम्' इति एकवद्भावे पञ्चगव सु। 'स नपुंसकम्' इति नपुंसकत्वे 'अतोऽम्' इत्यमि पूर्वरूपे पञ्चगवम्।*

**सूत्रम् - स नपुंसकम् २।४।१७।**

समाहारे द्विगुः द्वन्द्वश्च नपुंसकं स्यात्।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण नपुंसकत्वं विधीयते। समाहारे द्विगुः द्वन्द्वश्च नपुंसकं स्यात्।

**सूत्रम्- विशेषणं विशेष्येण बहुलम् २।१।५७।।**

भेदकं भेद्येन समानाधिकरणेन बहुलम् समस्यते। नीलोत्पलम्।

**टिप्पणिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण विशेषणविशेष्यत्वात् तत्पुरुषः विधीयते। भेदकं (विशेषणं) भेद्येन विशेषणेन सह वा समस्यते।

*नीलमुत्पलं नीलोत्पलम्। नील सु उत्पल सु इति अलौकिकविग्रहः। 'विशेषणं विशेष्येण' बहुलम् इति समासः। समासत्वात्सुपो लुक्। 'आद्गुणः' इति गुणे नीलोत्पल। तस्मात्प्रातिपदिकत्वात्सौ। 'अतोऽम्' इत्यमि अमि पूर्वः इति पूर्वरूपे च नीलोत्पलम्।*

सूत्रे बहुलग्रहणम् क्वचिन्नित्यम्। यथा कृष्णः सर्पः कृष्णसर्पः। क्वचिन्न समासः। यथा रामो जामादग्न्यः। अत्र समासो न। अयं कर्मधारयसमासः।

**सूत्रम्- उपमानानि सामान्यवचनैः २।२।५५।**

उपमानवाचकं सुबन्तं समानाधिकरणेन सामान्यार्थवाचकेन सुबन्तेन सह वा समस्यते।

टिप्पणिः- द्विपदं सूत्रम्। अनेन सूत्रेण उपमानतत्पुरुषसमासः विधीयते। उपमानवाचकं सुबन्तं सामानार्थवाचकेन सुबन्तेन सह वा समस्यते।

*घन इव श्यामो घनश्यामः। घनसदृशश्याम इत्यर्थः। घन सु श्याम सु इत्यलौकिकविग्रहः। 'उपमानानि सामान्यवचनैः' इति सूत्रेण समासः। समासत्वात्सुपो लुक्। घनश्याम। तस्मात्सौ अनुबन्धलोपे रुत्वे विसर्गे च घनश्यामः इति रूपम्।*

**वार्तिकम् - शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्।**

**टिप्पणिः-** शाकपार्थिवादीनां रूपाणां सिद्ध्यर्थम् उत्तरपदस्य लोपः वक्तव्यः। चतुष्पदं वार्तिकमिदम्। मध्यमपदलोपिसमासः अनेन वार्तिकेन विधीयते। शाकपार्थिवः इत्यादीनां रूपाणां सिद्ध्यर्थम् उत्तरपदलोपः स्यात्।

*शाकप्रियः पार्थिवः शाकपार्थिवः। शाकप्रिय सु पार्थिव सु इति अलौकिकविग्रहः। 'विशेषणं विशेषेण बहुलम्' इति समासः। समासत्वात् सुपो लुक्। अत्र 'शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्' इति वार्तिकेन शाकप्रिय इत्यस्य प्रिय इति उत्तरपदस्य लोपे शाकपार्थिव। सौ अनुबन्धलोपे रुत्वे विसर्गे शाकपार्थिवः। एवं देवपूजको ब्राह्मणः देवब्राह्मणः।*

**सूत्रम्- नञ् २।१।६।**

नञ् सुपा सह समस्यते।

**टिप्पणिः–** एकपदम् सूत्रम्। अनेन सूत्रेण नञ्समासः विधीयते। नञ् सुपा सह समस्यते।

*न ब्राह्मणः अब्राह्मणः। न ब्राह्मण सु इत्यलौकिकविग्रहः। 'नञ्' इति सूत्रेण समासः।*

**सूत्रम्- नलोपो नञः ६।३।७३।**

नञो नस्य लोपः स्यादुत्तरपदे।

**टिप्पणिः** द्विपदं सूत्रम्। अनेन सूत्रेण नलोपः विधीयते। नञ् सुपा सह समस्यते।

*न ब्राह्मणः अब्राह्मणः। न ब्राह्मण सु इत्यलौकिकविग्रहः। 'नञ्' इति सूत्रेण समासः। समासत्वात् सुपो लुक्। 'नलोपो नञः' इति नलोपे अब्राह्मण। तस्मात् सौ रुत्वे विसर्गे च अब्राह्मणः।*

**सूत्रम्-** **तस्मान्नुडचि ६।३।७४।।**

लुप्तनकारान्नञः उत्तरपदस्याजादेर्नुडागमः स्यात्।

**टिप्पणिः-** तस्मात् नुट् अचि इति त्रिपदं सूत्रम्। अनेन सूत्रेण नुडागमः विधीयते। लुप्तनकारान्नञः परस्य उत्तरपदस्याजादेर्नुडागमः स्यात्।

*न अश्वः- अनश्वः। न अश्व सु इत्यलौकिकविग्रहः। 'नञ्' इति सूत्रेण समासः। समासत्वात् सुपो लुक्। 'नलोपो नञः' इति नलोपे अ अश्वः। अत्र 'तस्मान्नुडचि' इति सूत्रेण नुडागमः। नुडि न् शिष्यते। अ नश्व। तस्मात् सौ अनुबन्धलोपे रुत्वे विसर्गे च अनश्वः इति रूपम्।*

*नैकधा (न एकधा) इत्यादौ न शब्देन सह 'सुप्सुपा' इति समासः। वृद्धौ नैकधा इति रूपम्। अत्र नलोपो न ।*

**सूत्रम्-** **कुगतिप्रादयः २।२।२८।**

कुगतिप्रादयः समर्थेन नित्यं समस्यन्ते।

**टिप्पणिः-** एकपदं सूत्रम्। कुश्च गतिः च प्रादिः च कुगतिप्रादयः। अनेन सूत्रेण कुगतिप्रादयः समस्यन्ते। 'नित्यं क्रीडाजीविकयोः' इति सूत्रात् नित्यम् इत्यनुवर्तते। कुगतिप्रादयः सुबन्तेन सह नित्यं समस्यन्ते। कु इति निन्दाद्योतकमव्ययम्।

*कुत्सितः पुरुषः कुपुरुषः । कु पुरुष सु इत्यलौकिकविग्रहः। 'कुगतिप्रादयः' इति समासः । समासत्वात् सुपो लुक्। कु इत्यस्य प्रथमानिर्दिष्टत्वात् उपसर्जनसंज्ञायां पूर्वनिपातः। विभक्तिकार्ये कुपुरुषः।*

**सूत्रम्- ऊर्यादिच्विडाचश्च २।४।६१।**

ऊर्यादयः च्व्यन्ताः डाजन्ताश्च क्रियायोगे गतिसंज्ञा स्युः।

**टिप्पणिः-** ऊर्यादिच्विडाचः च इति द्विपदं सूत्रम्। अनेन सूत्रेण गतिसंज्ञा विधीयते। गतिः इति पदमनुवर्तते। ऊर्यादयः च्व्यन्ताः डाजन्ताश्च क्रियायोगे गतिसंज्ञा स्युः।

*ऊरि इति गतिः कृत्वा इत्यनेन साकं समस्यते। 'कुगतिप्रादयः' इति सूत्रेण समासः। समासेन कृञ् धातोः ल्यप् इति क्त्वा इत्यस्य ल्यपि ऊरीकृत्य। (ल्यपि लकारपकारौ इतौ। तयोः लेपः। ह्रस्वस्य पिति किति तुक् इति तुगागमः। तकारः शिष्यते। कित्त्वात् अन्त्यावयवे ऊरीकृत्य।) पुनः सुप्रत्ययः। स्थानिवद्भावात् अव्ययत्वे 'अव्ययादाप्सुपः' इति सुलोपे ऊरीकृत्य। एवं शुक्लीकृत्य। अशुक्लं शुक्लं सम्पद्यमानं कृत्वा शुक्लीकृत्य। शुक्लशब्दात् च्विप्रत्ययः। च्विप्रत्ययः सर्वलोपि। 'अस्य च्वौ' इति अकारस्येकारः। च्व्यन्तत्वात् गतिसंज्ञा। अतः कृत्वा इत्यनेन 'कुगतिप्रादयः' इति समासः। क्त्वाप्रत्ययस्य ल्यप्। विभक्तिकार्ये च शुक्लीकृत्य। एवं पटपटाकृत्य। पटपटा इति डाजन्ता गतिः। सा कृत्वा इत्यनेन समस्यते। क्त्वाप्रत्ययस्य ल्यबादेशे विभक्तिकार्ये च पटपटाकृत्य।*

*शोभनः पुरुषः सुपुरुषः। सु पुरुष सु इत्यलौकिकविग्रहः। 'कुगतिप्रादयः' इति समासः। समासत्वात्सुपो लुक्। तस्मात्सौ विभक्तिकार्ये सुपुरुषः।*

**वार्तिकम्- प्रादयो गताद्यर्थे प्रथमया।**

**टिप्पणिः-** गताद्यर्थकः प्रादिः प्रथमान्तेन सह नित्यं समस्यते। त्रिपदं वार्तिकम्। गताद्यर्थकः प्रादिः प्रथमान्तेन सुबन्तेन सह नित्यं समस्यते।

*प्रगतः आचार्यः प्राचार्यः। प्र आचार्य सु इत्यलौकिकविग्रहः। 'प्रादयो गताद्यर्थे प्रथमया' इति वार्तिकेन समासः। समासत्वात्सुपो लुक् । प्र आचार्य। 'अकः सवर्णे दीर्घः' इति समवर्णदीर्घे प्राचार्य। तस्मात्सौ अनुबन्धलोपे रुत्वे विसर्गे च प्राचार्यः इति।*

**वार्तिकम्- अत्यादयः क्रान्ताद्यर्थे द्वितीयया।**

**टिप्पणिः-** क्रान्ताद्यर्थे अत्यादयः द्वितीयान्तेन सह नित्यं समस्यन्ते।त्रिपदं वार्तिकम्। क्रान्ताद्यर्थे अत्यादयः द्वितीयान्तेन सुबन्तेन सह नित्यं समस्यन्ते।

*अतिक्रान्तो मालाम् अतिमालः। अति माला अम् इत्यलौकिकविग्रहः। 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति वार्तिकेन समासः। समासत्वात्सुपः लुक्। 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वे अतिमाल। तस्मात्सुपि विभक्तिकार्ये अतिमालः।*

**सूत्रम्- एकविभक्तिश्चापूर्वनिपाते १।२।४४।।**

विग्रहे यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं स्यान्न तु तस्य पूर्वनिपातः।

**टिप्पणिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण उपसर्जनसंज्ञा विधीयते। विग्रहे यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं स्यान्न तु तस्य पूर्वनिपातः।

*अतिक्रान्तो मालाम् अतिमालः। अत्र मालाम् इति पदं विग्रहे नियतविभक्तिकम्। अतः अस्य 'एकविभक्ति चापूर्वनिपाते' इति सूत्रेण उपसर्जनसंज्ञा । अस्योपसर्जनस्य 'उपसर्जनं पूर्वम्' इति पूर्वनिपातो न। 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासः। समासत्वात्सुपः लोपः।*

**सूत्रम्- गोस्त्रियोरुपसर्जनस्य ।१।२।४८।**

उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात्।

**टिप्पणिः-** गोस्त्रियोः उपसर्जनस्य इति द्विपदं सूत्रम्। अनेन सूत्रेण प्रातिपदिकस्य ह्रस्वत्वं विधीयते। उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात्।

*अतिक्रान्तो मालाम् अतिमालः इत्यत्र 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति वार्तिकेन समासः। समासत्वत्सुपः लुक्। अतिमाला। माला इत्यस्य 'एकविभक्ति चापूर्वनिपाते' इति सूत्रेणोपसर्जनसंज्ञायां गोस्त्रियोरुपसर्जनस्य इति ह्रस्वे अतिमाल। तस्मात्सौ अनुबन्धलोपे रुत्वे विसर्गे च अतिमालः।*

**वार्तिकम्- अवादयः क्रुष्टाद्यर्थे तृतीयया।**

**टिप्पणिः-** अवादयः क्रुष्टाद्यर्थे तृतीयान्तैः पदैः सह नित्यं समस्यन्ते।

*अवक्रुष्टः कोकिलया अवलोकिलः। अव कोकिला टा इत्यलौकिकविग्रहः। 'अवादयः क्रुष्टाद्यर्थे तृतीयया' इति वार्तिकेन समासः। समासत्वात् सुपो लुक् अवकोकिला। 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वे अवकोकिल। तस्मात्सौ अनुबन्धलोपे रुत्वे विसर्गे च अवकोकिलः।*

**वार्तिकम्- पर्यादयो ग्लानाद्यर्थे चतुर्थ्या।**

**टिप्पणिः-** पर्यादयः ग्लानाद्यर्थे चतुर्थ्यन्तेन सुबन्तेन नित्यं समस्यन्ते। त्रिपदं वार्तिकम्। पर्यादयः ग्लानाद्यर्थे चतुर्थ्यन्तैः सुबन्तैः सह समस्यन्ते।

*परिग्लानः अध्ययनाय पर्यध्ययनः। 'पर्यादयः ग्लानाद्यर्थे चतुर्थ्या' इति वार्तिकेन समासः। समासत्वात्सुपः लुक्। परि अध्ययन। 'इको यणचि ' इति यणि पर्यध्ययन। विभक्तिकार्ये पर्यध्ययनः।*

**वार्ति कम्-** **निरादयः क्रान्ताद्यर्थे पञ्चम्या।**

**टिप्पणिः-** निरादयः क्रान्ताद्यर्थे पञ्चम्यन्तपदैः सह नित्यं समस्यन्ते। त्रिपदं वार्तिकम्। निरादयः क्रान्ताद्यर्थे पञ्चम्यन्तेन सह नित्यं समस्यन्ते।

*निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः। निर् कौशाम्बी ङस् इत्यलौकिकविग्रहः। 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति वार्तिकेन समासः। समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुक्। निर् कौशाम्बी। 'खरवसानयोर्विसर्जनीयः' इति रेफस्य विसर्गे निः कौशाम्बी। 'इदुदुपधस्य चाप्रत्ययस्य' इति षत्वे निष्कौशाम्बी। कौशाम्बी इत्यस्योपसर्जनसंज्ञायां 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वे निष्कौशाम्बि। विभक्तिकार्ये निष्कौशाम्बिः।*

**सूत्रम्-** **तत्रोपपदं सप्तमीस्थम् ३।२।९२।**

सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुम्भादि तद्वाचकं पदमुपपदसंज्ञं स्यात्।

**टिप्पणिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण उपपदसंज्ञा विधीयते। सप्तम्यां तिष्ठतीति सप्तमीस्थम्। सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुम्भादि तद्वाचकं पदमुपपदसंज्ञं स्यात्। यत्र 'कर्मण्यण्' इति कर्मण्युपपदे धातोः अण् विधीयते। तत्र कर्मणः कुम्भस्य उपपदसंज्ञा लभते। 'उपपदमतिङ्' इत्यादावस्य प्रयोजनम्।

**सूत्रम्-** **उपपदमतिङ् २।२।१९।**

उपपदं सुबन्तं समर्थेन नित्यं समस्यते।

**टिप्पणिः-** उपपदम् अतिङ् इति द्विपदं सूत्रम्। अनेन सूत्रेण उपपदसमासः विधीयते। सुपा, सह, नित्यम् इत्येते अनुवर्तन्ते। उपपदं सुबन्तं समर्थेन शब्देन नित्यं समस्यते। अयमतिङन्तः समासः। उपपदस्य तिङन्तेन सह समासो नास्ति इत्यर्थः। अयं तत्पुरुषः।

*कुम्भं करोतीति कुम्भकारः। कुम्भ अम् कार सु इत्यलौकिकविग्रहः। कुम्भमिति कर्म उपपदम्। कृञ् धातोः 'कर्मण्यण्' इति सूत्रेण अण्प्रत्यये कार इति । कुम्भपदस्य उपपदस्य प्रथमानिर्दिष्टत्वात् उपसर्जनत्वम्। तेन पूर्वनिपातः। 'उपपदमतिङ्' इति सूत्रेण समासे विभक्तिकार्ये च कुम्भकारः।*

**अतिङ् इति किम् ?** तिङन्तेन सह उपपदं न समस्यते। यथा - मा भवान् भूत् इत्यत्र 'माङि लुङ्' इति सप्तमीनिर्देशात् माङ् उपपदम्। अतो न समासः।

**परिभाषा-गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः।**

**टिप्पणिः-** गतिसंज्ञकस्य कारकसंज्ञकस्य च सुबुत्पत्तेः पूर्वमेव कृदन्तेन समासः कार्यः। कृदन्तेन साकं गतेः कारकस्य उपपदस्य च समासः क्रियते चेत् सुबुत्पत्तेः पूर्वमेव समास कार्यः। प्रथमं समासः, अनन्तरं सुबुत्पत्तिः कार्या। तेन व्याघ्री अश्वक्रीती कच्छपी इत्यादिरूपाणि।

*व्या जिघ्रतीति व्याघ्री। वि आङ् पूर्वकस्य घ्रा धातोः कप्रत्यये व्याघ्र इति कृदन्तम्। आङ् इति गतेः घ्रशब्देन, वि इति गतेः आघ्रशब्देन च 'कुगतिप्रादयः' इति सूत्रेण समासः। व्याघ्र। पुनः स्त्रीत्वविवक्षायां 'जातेरस्त्रिविषयादयोपधात्' इति ङीषि व्याघ्री इति रूपम्। पूर्वं सुबुत्पत्तिः पुनः समासः चेत् घ्रशब्दस्य स्त्रीत्वविवक्षायां जातिवाचकत्वाभावात् 'अजाद्यतष्टाप्' इति टापि घ्रा। पुनः समासे व्याघ्रा इत्यनिष्टं रूपम् आपद्येत। अतः अनया परिभाषया समासः पूर्वं पुनः सुबुत्पत्तिः।*

*एवम् अश्वेन क्रीता अश्वक्रीत। स्त्रीत्वे अश्वक्रीती। अश्व टा क्रीत सु इत्यलौकिकविग्रहे 'कर्तृकरणे कृता बहुलम्' इति समासः। समासत्वात् सुपो लुक्। स्त्रीत्वविवक्षायां 'क्रीतात्करणपूर्वात्' इति ङीषि अश्वक्रीती। अत्र 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति परिभाषाबलाद् इष्टरूपसिद्धिः। पूर्वं सुबुत्पत्तिः, पुनः समासः इति चेत् क्रीतशब्देन स्त्रीत्वे टापि क्रीता। अश्वेन क्रीता अश्वक्रीता इत्यनिष्टं रूपम् आपद्येत। 'क्रीतात्करणपूर्वात्' इति ङीष् न सिद्ध्यति। करणपूर्ववत्वाभावात्। कच्छेन कच्छं वा पिबतीति कच्छपी। अत्रापि सुबुत्पत्तेः प्राक् समासः। 'उपपदमतिङ्' इति सूत्रेण समासः। 'गतिकारकोपपदानां....' इति परिभाषया कच्छेति उपपदस्य कच्छप इत्यत्र वर्तमानेन कृदन्तस्य पशब्देन सह समासः। पुनः सुपि 'जातेरस्त्रिविषयादयोपधात्' इति ङीषि कच्छपी इतीष्टरूपसिद्धिः। अन्यथा सुबुत्पत्यनन्तरं समासः चेत् प इत्यस्य जातिवाचकत्वाभावात् टापि पुनः समासे कच्छपा इत्यनिष्टं रूपम् आपद्येत।*

**सूत्रम्- तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ५।४।८६।**

संख्याव्ययादेरङ्गुल्यन्तस्य समासान्तोऽच् स्यात्।

**टिप्पणिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण अच्प्रत्ययः विधीयते। संख्याव्ययादेरङ्गुल्यन्तस्य समासान्तोऽच्स्यात्।

*द्वे अङ्गुली प्रमाणमस्य द्व्यङ्गुलम्। द्वि औ अङ्गुलि औ इत्यलौकिकविग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इति समासे सुपो लुकि च द्वि अङ्गुलि। यणि 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' इति अच्प्रत्यये द्व्यङ्गुलि अ। 'यस्येति च' इति भस्य इकारस्य लोपे द्व्यङ्गुल। विभक्तिकार्ये द्व्यङ्गुलम्।*

*निर्गतमङ्गुलिभ्यो निरङ्गुलम्। निर् अङ्गुलि भ्यस् इत्यलौकिकविग्रहे 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति वार्तिकेन समासे सुपो लुकि निर् अङ्गुलि। अत्र 'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' इति अच्प्रत्यये भस्य इकारस्य लोपे विभक्तिकार्ये च निरङ्गुलम्।*

**सूत्रम्- अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः। ४।५।८७।**

अहरादिपूर्वस्य संख्याव्ययादेः रात्र्यन्तस्य तत्पुरुषस्य टच्स्यात्।

**टिप्पणिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण टच् विधीयते। अहन् - सर्व- एकादेशवाचि- संख्यात- पुण्य- संख्यावाचि- अव्यय एभ्यः परस्य रात्रिशब्दान्तस्य तत्पुरुषस्य टच्स्यात्।

*अहन् च रात्रिः च अहोरात्रः। अहन् सु रात्रि सु इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति सामासे समासत्वात्सुपः लुकि च अहन् रात्रि। 'रूपरात्रिरथन्तरेषु रुत्वं वाच्यम्' इति रुत्वे अहर् रात्रि। हशि च इति उत्वे गुणे अहोरात्रि। 'अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः' इति सूत्रेण टच्प्रत्यये अहोरात्रि अ । 'यस्येति च' इति भस्य इकारस्य लोपे अहोरात्र। विभक्तिकार्ये अहोरात्रः.। एवं सर्वरात्रः।*

*संख्यातरात्रः- संख्याता च असौ रात्रिः च संख्यातरात्रः। संख्याता सु रात्रि सु इत्यलौकिकविग्रहे 'विशेषणं विशेष्येण बहुलम्' इति समासः। समासत्वात् सुपो लुक्। संख्याता रात्रि। 'कर्मधारयजातीयदेशीयेषु' इति पुंवद्भावे संख्यातरात्रि। टचि भस्य लुकि च संख्यातरात्र। 'रात्राह्नाहाः पुंसि' इति पुंस्त्वे विभक्तिकार्ये संख्यातरात्रः।*

*सङ्ख्यापूर्वं रात्रं क्लीबम्। संख्यापूर्वः रात्रिशब्दः नपुंसकमेव । यथा द्विरात्रम्। द्वयोः रात्र्योः समाहारः द्विरात्रम्। द्वि ओस् रात्रि ओस्*

*इत्यलौकिकविग्रहः। 'तद्धितार्थोत्तरपदसमाहारे च' इति समासः। समासत्वात् सुपः लुक्। टच्प्रत्यये इकारलोपे च द्विरात्र। 'संख्यापूर्वं रात्रं क्लीबम्' इति लिङ्गानुशासनात् नपुंसकत्वे अमि पूर्वरूपे च द्विरात्रम्।*

**सूत्रम्-** **रात्राह्नाहाः पुंसि २।४।२९।**

रात्र- अह्न- अह द्वन्द्वतत्पुरुषौ पुंस्येव।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण पुंस्त्वं विधीयते। समाहारद्वन्द्वसमासस्य स नपुंसकत्वम् इति सूत्रेण नपुंसकत्वं विधीयते। रात्र- अहन् शब्दयोः द्वन्द्वतत्पुरुषयोः पुंस्त्वमनेन सूत्रेण विधीयते।

*अहन् च रात्रिः च अहोरात्रः । अहन् सु रात्रि सु इत्यलौकिकविग्रहे 'चार्थे द्वन्द्वः' इति समासः। समासत्वात् सुपो लुक्। अहन् शब्दस्य रुत्वे गुणे टच्प्रत्यये 'यस्येति च' इति इकारलोपे च अहोरात्र। तस्मात्सुपि अहोरात्र सु। 'रात्राह्नाहाः पुंसि' इति सूत्रेण पुंस्त्वम्। अनुबन्धलोपे रुत्वे विसर्गे च अहोरात्रः इति रूपम्।*

*सर्वा च असौ रात्रिश्च- सर्वरात्रः। सर्वा सु रात्रि सु इत्यलौकिकविग्रहः। 'विशेषणं विशेष्येण बहुलम्' इति समासः। समासत्वात् सुपो लुक्। सर्वारात्रि। 'सर्वनाम्नो वृत्तिमात्रो पुंवद्भावः' इति पुंवद्भावे सर्वरात्रि। टच्प्रत्यये इकारलोपे च सर्वरात्र। 'रात्राह्नाहाः पुंसि' इति पुंस्त्वे सर्वरात्रः।*

*तिसृणां रात्रीणां समाहारः त्रिरात्रम्। त्रि आम् रात्रि आम् इत्यलौकिकविग्रहः। 'तद्धितार्थोत्तरपदसमाहारे च' इति समासे समासत्वात्सुपो लुकि च त्रिरात्रि। टचि इकारलोपे सुपि च त्रिरात्र सु। 'सख्यापूर्वं रात्रं क्लीबम्' इति वचनानुसारेण नपुंसकत्वे अमि पूर्वरूपे च त्रिरात्रम्।*

**सूत्रम्- राजाहःसखिभ्यष्टच् ५।४।८१।**

राजाहःसख्यन्तात् तत्पुरुषात् टच्स्यात्।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण टच्प्रत्ययः विधीयते। राजन् -अहन्-सखिशब्देभ्यः तत्पुरुषात् टच्स्यात्।

*परमश्चासौ राजा च परमराजः। परम सु राजन् सु इत्यलौकिकविग्रहः। 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' इति सूत्रेण समासः। समासत्वात्सुपः लुकि परमराजन्। अत्र 'राजाहःसखिभ्यष्टच्' इति सूत्रेण टच्प्रत्यये परमराजन् अ (टच्) । 'नस्तद्धिते' इति टिलोपे परमराज् अ (परमराज)। सौ रुत्वे विसर्गे च परमराजः।*

**सूत्रम्- आन्महतः समानाधिकरणजातीययोः ६।३।४६।**

महतः आकारोऽन्तादेशः स्यात् समानाधिकरणे उत्तरपदे जातीये च परे।

**टिप्पणिः** आत् महतः समानाधिकरणजातीययोः इति त्रिपदं सूत्रम्। अनेन सूत्रेण आत्वं विधीयते। समानाधिकरणम् इत्यस्य एकद्रव्यवाचि इत्यर्थः। जातीयर् प्रत्ययः। उत्तरपदे इत्यनुवर्तते। महच्छब्दस्य आकारोऽन्तादेशः स्यात् समानाधिकरणे उत्तरपदे जातीये च परे।

*महान् चासौ राजा च महाराजः। महत् सु राजन् सु इत्यलौकिकविग्रहः। 'सन्महत्.......' इत्यादिना समासः। समासत्वात् सुपः लुकि महत् राजन्। अत्र 'आन्महतः समानाधिकरणजातीययोः' इति सूत्रेण आत्वे मह आ राजन् । सवर्णदीर्घे टच्प्रत्यये टिलोपे विभक्तिकार्ये च महाराजः।*

*महाप्रकारको महाजातीयः। प्रकारार्थे महच्छब्दात् जातीयर् प्रत्ययः। महत् जातीयर्। रेफः इत् । अत्र 'आन्महतः समानाधिकरणजातीययोः'*

*इति सूत्रेण आत्वे मह आ  जातीय। सवर्णदीर्घे महाजातीय। सुप्रत्यये रुत्वे विसर्गे महाजातीयः। महत्सदृशः इत्यर्थः।*

**सूत्रम्-** **द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ६।३।४७।**

द्वि -अष्टन् शब्दयोः आत्स्यात् संख्यायां किन्तु बहुव्रीह्यौ अशीतिशब्दे च परे न।

**टिप्पणिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण आत्वं विधीयते। पूर्वसूत्रात् आत् इत्यनुवर्तते। द्व्यष्टनोः आत्वमन्तादेशः स्यात्, किन्तु बहुव्रीहौ अशीतिशब्दे च परे न।

*द्वौ च दश च द्वादश। द्वि औ दशन् जस् इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासः। समासत्वात् सुपः लुकि द्विदशन्। अत्र दशन्शब्दे परे 'द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः' इति आत्वे नलोपे च द्वादश। तस्मात् जस् प्रत्यये 'षड्भ्यो लुक्' इति जसः लुकि द्वादश।अष्टाविंशतिः। अष्टौ च विंशतिः च अष्टाविंशतिः। अष्टन् जस् विंशति जस् इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासे समासत्वात्सुपः लुकि च अष्टन् विंशति। अत्र 'द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः' इति नकारस्य आत्वे अष्ट आ विंशति। सवर्णदीर्घे विभक्तिकार्ये च अष्टविंशतिः।*

**सूत्रम्-** **त्रेस्त्रयः ६।३।४८।**

त्रिशब्दस्य त्रयसादेसः स्यात् संख्यावाचके उत्तरपदे , नतु बहुव्रीह्यशीत्योः।

**टिप्पणिः** - त्रेः त्रयः इति द्विपदं सूत्रम्। अनेन सूत्रेण त्रयादेशः स्यात् संख्यावाचके परे, न तु बहुव्रीह्यशीत्योः।

*त्रयः च दश च त्रयोदश। त्रि जस् दशन् जस् इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासे, सुपः लुकि च त्रिदशन्। 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे त्रिदश। अत्र 'त्रेस्त्रयः' इति सूत्रेण त्रयसादेशे त्रयस् दश। ससजुषो रुः इति रुत्वे हशि च इति उत्वे च त्रय उ दश। गुणे विभक्तिकार्ये च त्रयोदश।*

*त्रयोविंशतिः- त्रयः च विंशतिश्च त्रयोविंशतिः। त्रि जस् विंशति जस् इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासः। समासे त्रयस् आदेशे त्रयस् विंशति। रुत्वे उत्वे गुणे विभक्तिकार्ये च त्रयोविंशतिः।*

*त्रयस्त्रिंशत्। त्रयः च त्रिंशत् च त्रयस्त्रिंशत्। त्रि जस् त्रिंशत् जस् इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासः। समासत्वात् सुपः लुक्। 'त्रेस्त्रयः' इति सूत्रेण त्रयसादेशे त्रयस् त्रिंशत्। तस्मात्सौ हल्ङ्यादिना सुलोपे त्रयस्त्रिंशत्।*

*त्रयो वा चत्वारो वा त्रिचतुराः। अत्र बहुव्रीहिसमासत्वात् त्रयसादेशो न।*

**सूत्रम्- परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः। २।४।२४६।**

द्वन्द्वतत्पुरुषयोः परपदस्येव लिङ्गं स्यात्।

**टिप्पणिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण समासस्य लिङ्गनिर्णयः क्रियते। द्वन्द्वतत्पुरुषयोः परपदस्येव लिङ्गं स्यात्।

*कुक्कुटः च मयूरी च कुक्कुटमयूर्यौ। कुक्कुट सु मयूरी सु इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति सामासः। समासत्वात्सुपो लुक्। पुनः औ प्रत्ययः।*

*'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति सूत्रेण परपदस्य मयूरीशब्दस्य स्त्रीलिङ्गे कुक्कुटमयूरी औ। 'इको यणचि' इति यणि कुक्कुटमयूर्यौ। इमे इति स्त्रीलिङ्गद्योतनाय प्रयुक्तम्।*

*एवं मयूरीकुक्कुटौ। मयूरी च कुक्कुटः च मयूरीकुक्कुटौ। द्वन्द्वसमासः। परपदस्य पुल्लिङ्गत्वात् औ विभक्तौ 'वृद्धिरेचि' इति वृद्धौ मयूरीकुक्कुटौ। अर्धं पिप्पल्याः अर्धपिप्पली। अर्धं सु पिप्पली ङस् इति अलोकिकविग्रहः। 'अर्धं नपुंसकम्' इति समासः। समासत्वात्सुपः लुक्। तस्मात्सुप्रत्यये 'परवल्लिङ्गं द्वन्दतत्पुरुषयोः' इति सूत्रानुसारेण परवल्लिङ्गे स्त्रीलिङ्गे 'हल्ङ्याभ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सुलोपे अर्धपिप्पली इति रूपम्।*

**वार्तिकम्- द्विगुप्राप्तपन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः।**

**टिप्पणिः-** द्विगु- प्राप्त- आपन्न- अलंपूर्व- गतिसमासेषु परवल्लिङ्गप्रतिषेधः वाच्यः। त्रिपदं वार्तिकम्। अनेन वार्तिकेन परवल्लिङ्गप्रतिषेधः क्रियते। द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु परवल्लिङ्गं न।

*पञ्चसु कपालेषु संस्कृतः पञ्चकपालः (पुरोडाशः)। तद्धितार्थविषयः द्विगुसमासोऽयम्। पञ्चन् सु कपाल सु इति अलौकिकविग्रहः। समासत्वात् सुपो लुक्। 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे पञ्चकपाल। ततः 'संस्कृतं भक्षाः' इत्यणि द्विगोर्लुगनपत्ये इति अणो लुकि पञ्चकपाल। तस्मात्सुप्रत्ययः। अत्र 'द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः' इति वार्तिकबलात् परवल्लिङ्गं न। किन्तु पुरोडाशः इत्यस्य (विशेष्यस्य) लिङ्गानुसारं पुल्लिङ्गे विभक्तिकार्ये पञ्चकपालः इति रूपम्।*

**सूत्रम्- प्राप्तापन्ने च द्वितीयया २।२।४।**

द्वितीयान्तेन प्राप्तापन्ने समस्येते अकारश्चानयोरन्तादेशः।

**टिप्पणिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण तत्पुरुषसमासः, अकारो अन्तादेशश्च विधीयेते। प्राप्तापन्ने समस्येते अनयोः प्राप्तापन्नयोः अकारोऽन्तादेशश्च।

*प्राप्तो जीविकां प्राप्तजीविकः। प्राप्त सु जीविका अम् इत्यलौकिकविग्रहः। 'प्राप्तापन्ने च द्वितीयया' इति सूत्रेण समासे प्राप्तशब्दस्य उपसर्जनत्वात् प्राक्प्रयोगः। प्राप्त जीविका। ततः 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वे तस्मात् सौ विभक्तिकार्ये प्राप्तजीविकः। जीविकां प्राप्ता स्त्री प्राप्तजीविका। अत्र अकारोऽन्तादेशः ।*

*अलङ्कुमारिः । अलं कुमार्यै अलङ्कुमारिः। अलं कुमारी ङे इत्यलौकिकविग्रहः। 'द्विगुप्राप्तापन्नांलपूर्वगतिसमासेषु प्रतिषेधो वाच्यः' इति वार्तिकज्ञापकत्समासे परपदल्लिङ्गनिषेधे च अलं कुमारी। 'एकविभक्ति चापूर्वनिपाते' इत्युपसर्जनसंज्ञायां 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वे अलं कुमारि। 'अनुस्वारस्य' ययि परसवर्णः अलङ्कुमारि। सौ रुत्वे विसर्गे च अलङ्कुमारिः।*

*निष्कौशाम्बिः इति गतिसमासोदाहरणे परवल्लिङ्गम् । (निष्कौशाम्बिः इत्यस्य रूपमन्यत्र दत्तम्)*

**सूत्रम्- अर्धर्चाः पुंसि च २।४.३१।**

अर्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः।

**टिप्पणिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण पुस्त्वं क्लीबत्वं च विधीयते। अर्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः।

*ऋचः अर्धम् अर्धर्चः अर्धर्चं वा। ऋच् ङस् अर्ध सु इत्यलौकिकविग्रहः। 'अर्धं नपुंसकम्' इति समासः। समासत्वात् सुपो लुक्। अर्धशब्दस्योपसर्जनत्वात् पूर्वनिपाते अर्ध ऋच्। 'ऋक्पूरब्धूः पथामानक्षे' इति अ इति समासान्तप्रत्यये अर्ध ऋच। गुणे अर्धर्च । सौ 'अर्धर्चाः पुंसि च' इति पुंस्त्वे अर्धर्चः, क्लीबे अर्धर्चम् इति रूपद्वयम्। अर्धर्चादिगणे ध्वज- तीर्थ- शरीर-मण्ड-पीयूष-देह- अङ्कुश- पात्र-सूत्रादयः शब्दाः पठिताः। सामान्ये नपुंसकम्।*

*विशेष्यं न निर्दिष्टं चेत् विशेषणं नपुंसकमेव। मृदु पचति इत्यत्र मृदु क्रियाविशेषणम्। तद् नपुंसकमेव। प्रातः कमनीयम् इत्यत्र कमनीयं विशेषणमेव। अत्र विशेष्यस्यानिर्देशात् विशेष्यलिङ्गं नास्तीत्यतः विशेषणं नपुंसकमेव।*

इति तत्पुरुषसमासप्रकरणम्।



# पठनप्रवर्तनानि

**कोष्ठात्समुचितमुत्तरं निर्धार्य लिखत-**

१. द्विगुरपि———संज्ञकः स्यात्। (कर्मधारयः, तत्पुरुषः, द्वन्द्वः)

२. शङ्खुलया खण्डः ——। (शङ्खुलाखण्डः, शङ्खुलीखण्डः, शङ्खुलखण्डः)

३. ——— गतिकारकपूर्वस्यापि ग्रहणम्। (विग्रहे, कृद्ग्रहणे, समासग्रहणे)

४. अश्वाय घासः इत्यत्र —— न समासः। (विकृतित्वात्, चतुर्थ्यभावात्, प्रकृतित्वाभावात्)

५. दिग्वर्थः समाहारः——— स्यात्। ( एकवद्, बहुत्ववद्, अनेकवत्)

६. गतिसंज्ञाविधायकं सूत्रमधोनिर्दिष्टेषु किं भवति। (कुगतिप्रादयः, गोस्त्रियोरुपसर्जनस्य, ऊर्यादिच्विडाचश्च)

**सूत्राणि व्याख्यात-**

१. द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः।

२. पञ्चमी भयेन।

३. सप्तमी शौण्डैः।

४. उपमानानि समान्यवचनैः।

५. एकविभक्ति चापूर्वनिपाते।

६. राजाहस्सखिभ्यष्टच्।

**उत्तरयत-**

१. अक्ष्णा काणः इत्यत्र समासः कुतो न स्यात्?

२. यूपदारु इत्यत्र प्रातिपदिकस्य सोर्लोपः केन सूत्रेण विधीयते?

३. नैकधा इत्यत्र समासः केन सूत्रेण विधीयते?

४. 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' कोऽर्थः?

एकमुदाहरणं लिखतु ?

५. ‘आन्महतः समानाधिकरणजातीययोः’ इति सूत्रस्य एकमुदाहरणं लिखत।

**सप्रमाणं समस्यत-**

१. हरित्रातः।

२. स्तोकान्मुक्तः।

३. अर्धपिप्पली।

४. पूर्वेषुकामशमी।

५. पौर्वशालः।

६. अहोरात्रः।

७. निरङ्कुलम्।

८. पञ्चगवधनः

९. कुम्भकारः।

१०. निष्कौशाम्बिः।

**यथोचितं योजयत**

| क | ख |
|---|---|
| १. षष्ठी। | १. नीलोत्पलम्। |
| २. पूर्वापराधरोत्तरमेक-देशिनैकाधिकरणे। | २. शाकपार्थिवः |
| ३. विशेषणं विशेषेण बहुलम्। | ३. अनश्वः |
| ४. मध्यमपदलोपसमासः। | ४. राजपुरुषः |
| ५. नञ्। | ५. अपरकायः |

# अधिकविस्तरः
## तत्पुरुषः

| समासनाम | विधीयमानं सूत्रम् | समस्तं रूपम् | लौकिकविग्रहः |
| --- | --- | --- | --- |
| प्रथमातत्पुरुषः | पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे। | पूर्वकायः। | पूर्वं कायस्य |
| द्वितीयातत्पुरुषः | द्वितीया श्रितातीतपतित ...... | कृष्णश्रितः। | कृष्णं श्रितः। |
| तृतीयातत्पुरुषः | तृतीया तत्कृतार्थेन गुणवचनेन। | शङ्खुलाखण्डः। | शङ्खुलया खण्डः। |
| चतुर्थीतत्पुरुषः | चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः। | यूपदारु। | यूपाय दारु। |
| पञ्चमीतत्पुरुषः | पञ्चमी भयेन। | चोरभयम्। | चोराद् भयम्। |
| षष्ठीतत्पुरुषः | षष्ठी। | राजपुरुषः। | राज्ञः पुरुषः। |
| सप्तमीतत्पुरुषः | सप्तमी शौण्डैः। | अक्षशौण्डः। | अक्षेषु शौण्डः। |

| समासनाम | विधीयमानं सूत्रम् | समस्तं रूपम् | लौकिकविग्रहः |
|---|---|---|---|
| कर्मधारयसमासः | तत्पुरुषःसमानाधिकरणः कर्मधारयः। सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः। | परमराजः। | परमः चासौ राजा च। |
| द्विगुसमासः | संख्यापूर्वो द्विगुः। दिक्संख्ये संज्ञायाम्। | सप्तर्षयः। | सप्त च ते ऋषयः च। |
| विशेष्यविशेषणभावसमासः। | विशेषणं विशेष्येण बहुलम्। | नीलोत्पलम्। | नीलम् उत्पलम्। |
| उपमानतत्पुरुषसमासः। | उपमानानि सामान्यवचनैः। | घनश्यामः। | घन इव श्यामः। |
| मध्यमपदलोपिसमासः। | वा- शाकपार्थिवादीनां सिद्धये उत्तरपदलोप- स्योपसंख्यानम्। | शाकपार्थिवः। | शाकप्रियः पार्थिवः। |
| नञ्समासः | नञ् | अब्राह्मणः | न ब्राह्मणः। |
| गतिसमासः | कुगतिप्रादयः | कुपुरुषः | कुत्सितः पुरुषः। |
| उपपदसमासः | उपपदमतिङ् | कुम्भकारः | कुम्भं करोतीति। |

अथ समासप्रकरणम्



१.५

## पञ्चमः पाठः

# बहुव्रीहिसमासः

**सूत्रम्-** **शेषो बहुव्रीहिः २।२।२३।**

अधिकारोऽयं प्राक् द्वन्द्वात्।

**टिप्पणिः-** द्विपदं सूत्रम्। अधिकारोऽयम्। 'चार्थे द्वन्द्वः' इत्यतः प्राग् बहुव्रीहिः इति पदमनुवर्तते। शेषः इत्यस्य उक्तादन्यः प्रथमान्तः इत्यर्थः।

**सूत्रम्-** **अनेकमन्यपदार्थे २।२।२४।**

अनेकं प्रथमान्तमन्यस्य पदस्यार्थे वर्तमानं वा समस्यते सः बहुव्रीहिः।

टिप्पणिः- द्विपदं सूत्रम्। अनेन सूत्रेण बहुव्रीहिसमासः विधीयते। शेषः इत्यस्य प्रथमान्तः इत्यर्थः। अन्यपदस्यार्थे वर्तमानमनेकं प्रथमान्तं विकल्पेन समस्यते सः बहुव्रीहिः।

**सूत्रम्-** **सप्तमीविशेषणे बहुव्रीहौ २।२।३५।**

सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं स्यात्।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण सप्तम्यन्तं विशेषणं च पूर्वं स्यादिति विधीयते। सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं स्यात्। अनेन सूत्रेण क्वचित् व्यधिकरणेऽपि बहुव्रीहिः स्यादिति ज्ञाप्यते। कण्ठे कालः यस्य सः कण्ठेकालः इति व्यधिकरणबहुव्रीहिः।

**सूत्रम्- हलदन्तात्सप्तम्याः संज्ञायाम् ६।३।९।**

हलन्ताददन्ताच्च सप्तम्या अलुक्।

**टिप्पणिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण सप्तम्याः अलुक् विधीयते। हलन्ताददन्ताच्च प्रातिपदिकात् परस्य सप्तम्याः अलुक् स्यात् उत्तरपदे परे संज्ञायां चेत्।

*कण्ठे कालः यस्य सः कण्ठेकालः शिवः इत्यर्थः। कण्ठ ङि काल सु इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इत्यनेन समासः। समासत्वात् प्रातिपदिकत्वेन 'सुपो धातुप्रातिपदिकयोः' इति सूत्रेण विधीयमानः सुब्लुक् अनेन सूत्रेण सप्तम्या अलुक् । कण्ठेकाल। तस्मात्सौ विभक्तिकार्ये कण्ठेकालः इति रूपम्।*

*प्राप्तोदकः (ग्रामः)। प्राप्तमुदकं यं सः प्राप्तोदकः। प्राप्त सु उदक सु इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति समासः। समासत्वात् सुपः लुक्। गुणे प्राप्तोदक। सौ विभक्तिकार्ये प्राप्तोदकः इति रूपम्।*

*ऊढरथो अनड्वान्। ऊढः रथः येन सः ऊढरथः। ऊढ सु रथ सु इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति समासः। समासत्वात् सुपः लुक्। पुनः सौ विभक्तिकार्ये ऊढरथः इति रूपम्।*

*उपहृतपशुः (रुद्रः) । उपहृतः पशुः यस्मै सः उपहृतपशुः। उपहृत सु पशु सु इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति समासः। समासत्वात् सुपो लुक्। पुनः सौ विभक्तिकार्ये उपहृतपशुः इति रूपम्।*

*पीताम्बरो हरिः। पीतम् अम्बरम् यस्य सः पीताम्बरः। पीत सु अम्बर सु इत्यलौकिकविग्रहे बहुव्रीहिसमासः। समासत्वात् सुपो लुकि सवर्णदीर्घे पीताम्बर।सौ विभक्तिकार्ये पीताम्बरः इति रूपम्।*

*वीरपुरुषकः ग्रामः। वीराः पुरुषाः यस्मिन् सः वीरपुरुषकः। वीरा जस् पुरुष जस् इत्यलौकिकविग्रहे बहुव्रीहिसमासः। समासत्वात् सुपो लुक् समासान्ते कप् प्रत्यये वीरपुरुषक। तस्मात्सौ रुत्वे विसर्गे च वीरपुरुषकः।*

**वार्तिकम्- प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः।**

**टिप्पणिः-** प्रादिभ्यः परस्य यो धातुजः प्रथमान्तः तदन्तस्य प्रथमान्तेन समासः स्यात् विकल्पेनोत्तरपदलोपश्च। षड्पदं वार्तिकम्। अनेन वार्तिकेन प्रादिभ्यः परः धातुजः प्रथमान्तः अन्येन प्रथमान्तेन समस्यते तथा विकल्पेन उत्तरपदलोपश्चविधीयेते।

*प्रपतितं पर्णं यस्मात् सः प्रपतितिपर्णः प्रपर्णः वा। प्रपतित सु पर्ण सु इत्यलौकिकविग्रहः। 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' इति वार्तिकेन समासे विकल्पेन उत्तरपदलोपश्च। समासत्वात् सुपो लुकि प्रपर्ण। सौ विभक्तिकार्ये प्रपर्णः। उत्तरपदलोपाभावे प्रपतितपर्णः इति रूपम्।*

**वार्तिकम्- नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः**

**टिप्पणिः-** नञः परस्यअस्त्यर्थकसुबन्तस्य बहुव्रीहिसमासः विकल्पेन अस्त्यर्थवाचकस्योत्तरपदस्य लोपश्च। षड्पदं वार्तिकम्। अनेन वार्तिकेन नञः अस्त्यर्थवाच्य बहुव्रीहिसमासः विकल्पेन उत्तरपदलोपश्च विधीयते।

*अविद्यमानः पुत्रः यस्य सः अपुत्रः अविद्यमानपुत्रः वा। न विद्यामानः अविद्यमानः। नञ्समासः। अविद्यमान सु पुत्र सु इत्यलौकिकविग्रहः। 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः' इति वार्तिकेन समासे उत्तरपदलोपे च अपुत्र। विभक्तिकार्ये अपुत्रः। उत्तरपदलोपाभावे अविद्यमानपुत्रः इति।*

**सूत्रम्- स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु। ६।३।३४।**

तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं तस्मात् पर ऊङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं स्यात् समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे न तु पूरण्यां प्रियादौ च परतः।

**टिप्पणिः-** स्त्रियाः, पुवद्भाषितपुरस्काद् अनुङ् समानाधिकरणे स्त्रियाम् अपूरणीप्रियादिषु इति षड्पदं सूत्रम्। अनेन सूत्रेण पुंवद्भावः विधीयते। पुंसः इव पुंवद्। भाषितः पुमान् येन तत् भाषितपुंस्कम्। ऊङः अभाव अनूङ्। भाषितपुंस्काद् अनूङ् यस्यां स भाषितपुंस्कादनूङ्। तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुस्कं तस्मात् पर ऊङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं स्यात् समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे। किन्तु स्त्रीलिङ्गे पूरणप्रत्ययान्ते स्त्रीलिङ्गशब्दात् प्रियादौ च परे न पुंवद्भावः।

*चित्राः गावः यस्य सः चित्रगुः। चित्रा जस् गो जस् इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति समासः। समासत्वात्सुपिः। लुकि चित्रागो। अत्र 'स्त्रियाः पुंवद्भाषितपुंस्कादनुङ्समानाधिकरणे स्त्रियामपूरणीप्रियादिषु' इति सूत्रेण पुवद्भावे चित्रगो। 'एकविभक्ति चापूर्वनिपाते' इत्युपसर्जनसंज्ञायां 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वे चित्रगु। विभक्तिकार्ये चित्रगुः इति।*

*रूपवद्भार्यः। रूपवती भार्या यस्य सः रूपवद्भार्यः। रूपवती सु भार्या सु इत्यलौकिकविग्रहे बहुव्रीहिसमासः। समासत्वात् सुपः लुक्। अत्र 'स्त्रियाः पुवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु' इति पुंवद्भावे रूपवत् भार्या। 'गोस्त्रियो...' इति ह्रस्वे रूपवत् भार्य। जश्त्वे रूपवद्भार्य। विभक्तिकार्ये रूपवद्भार्यः इति।*

अनूङ् इति किम्? ऊङ् इति स्त्रीप्रत्ययसहितस्य स्त्रीलिङ्गशब्दस्य पुंवद्भावो न। यथा वामोरूभार्यः। वामौ (सुन्दरौ) ऊरु यस्याः सा वामोरूः, सा भार्या यस्य सः वामोरूभार्यः। अत्र वामोरू इत्यत्र पुंवद्भावो न।

**सूत्रम्-** **अप्पूरणीप्रमाण्योः ।५।४।११६।।**

पूरणार्थप्रत्ययान्तं यत्स्त्रीलिङ्गं तदन्तात् प्रमाण्यन्ताच्च बहुव्रीहेरप्स्यात्।

**टिप्पणिः--** अप् पूरणीप्रमाण्योः इति द्विपदं सूत्रम्। अनेन सूत्रेण अप्प्रत्ययः विधीयते। पूरणी च प्रमाणी च पूरणीप्रमाण्यौ तयोः पूरणीप्रमाण्योः । बहुव्रीहौ इत्यनुवर्तते। पूरणप्रत्ययान्तं यत्स्त्रीलिङ्गं तदन्तात् प्रमाण्यन्ताच्च अप्प्रत्ययः स्यात् बहुव्रीहौ।

*कल्याणी पञ्चमी यासां ताः कल्याणीपञ्चमाः रात्रयः। कल्याणी पञ्चमी इत्यनयोः प्रथमान्तयोः बहुव्रीहिसमासः। पञ्चानां पूरणी पञ्चमी। अयं पूरणप्रत्ययान्तः स्त्रीलिङ्गशब्दः। अस्य 'स्त्रियाः पुंवद्भावः.....' इत्यादिना न पुंवद्भावः। कल्याणी सु पञ्चमी सु इत्यलौकिकविग्रहः। बहुव्रीहिसमासः। समसात्वात् सुब्लुकि 'अप्पूरणीप्रमाण्योः' इत्यप्प्रत्यये कल्याणी पञ्चमी अ। 'यस्येति च' इति ईकारलोपे कल्याणी पञ्चम। तस्माज्जसि विभक्तिकार्ये कल्याणीपञ्चमाः इति।*

*स्त्रीप्रमाणः। स्त्री प्रमाणी यस्य सः स्त्रीप्रमाणः। स्त्री सु प्रमाणी सु इत्यलौकिकविग्रहे बहुव्रीहिसमासः। समासान्तत्वात्सुब्लुकि स्त्रीप्रमाणी। अत्र न पुंवद्भावः। 'अप्पूरणीप्रमाण्योः' इति अप्प्रत्यये स्त्रीप्रमाणी अ। 'यस्येति च' इति ईकारलोपे विभक्तिकार्ये च स्त्रीप्रमाणः।*

स्त्रियाः पुंवद्भाषित इति सूत्रे अप्रियादिषु इति किम्? प्रियादिषु परेषु पुंवद्भावो न। यथा कल्याणीप्रियः। कल्याणी सु प्रिया सु इत्यलौकिकविग्रहः। बहुव्रीहिः। समासत्वात् सुब्लुक्। अत्र कल्याणी इत्यत्र पुंवद्भावो न । प्रियशब्दस्य परत्वात्।

'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वे कल्याणीप्रिय। विभक्तिकार्ये कल्याणीप्रियः।

**सूत्रम्- बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् ५।४।११३।**

स्वाङ्गवाचि सक्थ्यक्ष्यन्तात् बहुव्रीहेः षच् स्यात्।

**टिप्पणिः**– चतुष्पदं सूत्रम्। अनेन सूत्रेण षच्प्रत्ययः समासान्तः विधीयते। स्वाङ्गवाचि सक्थ्यक्ष्यन्तात् (सक्थि- अक्षि- अन्तात्) बहुव्रीहेः षच्प्रत्ययः स्यात्। षचि अकारः शिष्यते। 'षः प्रत्ययस्य' इति सूत्रेण षकारः 'हलन्त्यम्' इत्यनेन चकारः चेतौ।

*दीर्घे सक्थिनी यस्य सः दीर्घसक्थः। सक्थिशब्दः स्वाङ्गवाचि भवति। दीर्घ औ सक्थि औ इत्यलौकिकविग्रहः। 'बहुव्रीहिसामासः। समासत्वात् सुब्लुक्।' बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्' इति षचि 'यस्येति च' इति इकारलोपे विभक्तिकार्ये च दीर्घसक्थः।*

*जलजाक्षी। जलजे इव अक्षिणी यस्याः सा जलजाक्षी। जलज औ अक्षि औ इत्यलौकिकविग्रहः। 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वङ्गात्षच्' इति षचि इकारलोपे सवर्णदीर्घे च जलजाक्ष। ततः स्त्रियां 'षिद्गौरादिभ्यश्च' इति ङीष्। विभक्तिकार्ये जलजाक्षी।*

*स्वाङ्गात् किम्? दीर्घसक्थि (शकटम्) स्वाङ्गवाचित्वाभावात् न षच्। एवं स्थूलाक्षा (वेणुयष्टिः)। अत्रापि स्वाङ्गत्वाभावात् न षच्। अत्राक्षिशब्दः न नेत्रपर्यायः। अतः 'अक्ष्णोऽदर्शनात्' इति सूत्रेण अच्प्रत्ययः। 'यस्येति च' इति इलोपे स्थूलाक्ष। स्त्रीत्वे टापि स्थूलाक्षा। विभक्तिकार्ये स्थूलाक्षा इति।*

**सूत्रम्- द्वित्रिभ्यां षः मूर्ध्नः ५। ४। ११५।**

द्वित्रिभ्यां मूर्ध्नः षः स्याद् बहुव्रीहौ।

**टिपण्णिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण षप्रत्ययः विधीयते। द्वित्रिभ्यां परस्य मूर्ध्नः षः स्याद् बहुव्रीहौ।

*द्वौ मूर्धानौ यस्य सः द्विमूर्धः। द्वि औ मूर्धन् औ इत्यलौकिकविग्रहः। बहुव्रीहिः। समासत्वात् सुब्लुक्। अत्र 'द्वित्रिभ्यां षः मूर्ध्नः' इति सूत्रेण षप्रत्यये 'नस्तद्धिते' इति टिलोपे च द्विमूर्ध । विभक्तिकार्ये द्विमूर्धः इति।*

*एवं त्रिमूर्धः। त्रयः मूर्धानो यस्य सः त्रिमूर्धः। त्रि जस् मूर्धन् जस् इत्यलौकिकविग्रहः। बहुव्रीहिः। समासत्वात् सुलोपः। 'द्वित्रिभ्यां षः मूर्ध्नः' इति षत्वे टिलोपे विभक्तिकार्ये च त्रिमूर्धः इति।*

**सूत्रम्- अन्तर्बहिभ्यां च लोम्नः ५।४।११७।**

अन्तर्बाहिशब्दाभ्यां लोम्नोऽप्स्यात् बहुव्रीहौ।

**टिप्पणिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण अप्प्रत्ययः विधीयते। अन्तर्बाहिश्शब्दाभ्यां परस्य लोमन् शब्दस्य अप्प्रत्ययः स्याद् बहुव्रीहौ। अकारः शिष्यते।

*अन्तर्गतानि लोमानि यस्य सः अन्तर्लोमः। अन्तर् लोमन् जस् इत्यलौकिकविग्रहः। बहुव्रीहिः। समासत्वात् सुपः लुक्। अत्र 'अन्तर्बहिभ्यां च लोम्नः' इति सूत्रेण अप्प्रत्यये अन्तर् लोमन् अ। टिलोपे अन्तर्लोम । विभक्तिकार्ये अन्तर्लोमः इति।*

बहिर्लोमः। बहिर्गतानि लोमानि यस्य सः बहिर्लोमिः। बहिस् लोमन् जस् इत्यलौकिकविग्रहः। बहुव्रीहिः। समासत्वात् सुपो लुक्। 'अन्तर्बहिभ्यां च लोम्नः' इति सूत्रेण अप्प्रत्यये बहिस् लोमन् अ। टिलोपे 'ससजुषोः रुः' इति रुत्वे बहिर्लोम। विभक्तिकार्ये बहिर्लोमः इति।

**सूत्रम्- पादस्य लोपोऽहस्त्यादिभ्यः ५।४।१३८।**

हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्य लोपः स्यात् बहुव्रीहौ।

**टिप्पणिः-** त्रिपदं सूत्रम्। अनेन सूत्रेण पादशब्दान्तस्य लोपः विधीयते। बहुव्रीहौ, समसान्तः, उपमानात् इति पदानि अनुवर्तन्ते। हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्य लोपः स्यात् बहुव्रीहौ।

*व्यघ्रस्य इव पादौ यस्य सः व्यघ्रपात्। व्याघ्र ङस् पाद औ इति अलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति समासः। समासत्वात् सुपः लुकि 'पादस्य लोपोऽहस्त्यादिभ्यः' इति पादशब्दान्तस्य लोपे व्याघ्रापाद्। विभक्तिकार्ये व्याघ्रपात् इति रूपम्। अहस्त्यादिभ्यः इति किम्? हस्तिपादः इत्यत्र हस्ती उपमानम्। सूत्रे अहस्त्यादिभ्यः इति निषेधात् । कुसूलपादग्रहणात् कुसूलपादः इत्यत्र न लोपः।*

**सूत्रम्- संख्यासुपूर्वस्य ५।४।१४०।**

पदस्य लोपः स्यात् समासान्तो बहुव्रीहौ।

**टिप्पणिः-** एकपदं सूत्रम्। अनेन सूत्रेण पादान्तस्याकारस्य लोपः विधीयते। पादस्य लोपः समासान्तः बहुव्रीहौ इति पदानि अनुवर्तन्ते। संख्यावाचिशब्देभ्यः सुशब्दाच्च परस्य समासान्तस्य पादशब्दस्य लोपः स्यात् बहुव्रीहौ।

*द्वौ पादौ यस्य सः द्विपात्। द्वि औ पाद औ इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति समासः। तस्मात्सुपि द्विपाद। अत्र संख्यासुपूर्वस्य इति सूत्रेण पादशब्दान्तस्याकारस्य लोपे द्विपाद्। चर्त्वे विभक्तिकार्ये द्विपात् इति। एवं त्रिपात् । सु (शोभनौ) पादौ यस्य सः सुपात्।*

**सूत्रम्- उद्विभ्यां काकुदस्य ५.४। १४७।**

'उद् वि' आभ्यां परस्य काकुदशब्दान्तस्य अकारस्य लोपः स्याद् बहुव्रीहौ।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण काकुदशब्दान्तस्य अकारलोपः विधीयते।

मित्रमित्यर्थे सुहृद् इति, अमित्रम् (शत्रुः) इत्यर्थे दुर्हृद् इति हृदयशब्दस्य हृद्भावः च निपात्यते।

*सु (शोभनं) हृदयं यस्य सः सुहृत्। सु हृदय सु इत्यलौकिकविग्रहः। बहुव्रीहिसमासः। समासत्वात्सुपः लुक्। अनेन 'सुहृद्दुर्हृदौ मित्रामित्रयोः' इति सूत्रेण हृद्भावे सुहृत्। विभक्तिकार्ये सुहृत्। सुहृन्मित्रम्। एवं दुर्हृत्। दुष्टं हृदयं यस्य सः दुर्हृत्। दुर्हृदमित्रम्।*

*उद्गतं काकुदं यस्य सः उत्काकुत्। उद् काकुद अम् इत्यलौकिकविग्रहः। बहुव्रीहौ सुपः लुक्। 'उद्विभ्यां काकुदस्य' इति सूत्रेण अकारलोपः। पुनः विभक्तिकार्ये चर्त्वे च उत्काकुत्।*

**सूत्रम् - सुहृद्दुर्हृदौ मित्रामित्योः ५।४।१५०।**

द्विपदं सूत्रम्। मित्रमित्यर्थे सुहृद् , अमित्रमित्यर्थे दुर्हृद् च निपात्यते।

**सूत्रम्- उरः प्रभृतिभ्यः कप् ५।४।१५१।**

उरः प्रभृतिभ्यः बहुव्रीहौ कप् प्रत्ययः स्यात्।

**टिप्पणिः-** उरः प्रभृतिभ्यः शब्देभ्यः बहुव्रीहौ कप् प्रत्ययः स्यात्।

*व्यूढं उरः यस्य सः व्यूढोरस्कः। व्यूढ सु उरस् सु इत्यलौकिकविग्रहः। बहुव्रीहिः। समासत्वात् सुपः लुक्। गुणे व्यूढोरसस्। अत्र 'उरः प्रभृतिभ्यः कप्' इति सूत्रेण कप्प्रत्यये व्यूढोरस्क। कपि कः शिष्यते। विभक्तिकार्ये व्यूढोरस्कः।*

**सूत्रम्- सोऽपदादौ ८।३।३८।**

पाशकल्पककाम्येषु विसर्गस्य सः स्यात्।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण विसर्गस्य सकारः विधीयते। पाश - कल्प- क-काम्य एषु परेषु विसर्गस्य सः स्यात्। जिह्वामूलीयस्यापवादः।

*व्यूढ उरस् क इत्यवस्थायां रुत्वे रेफस्य विसर्गे 'सोऽपदादौ' इति सत्वे च व्युढ उरस् क । गुणे व्यूढोरस्क । विभक्तिकार्ये व्यूढोरस्कः।*

**सूत्रम्- कस्कादिषु च ८।३।४८।**

कस्कादिषु इण उत्तरस्य विसर्गस्य षः स्यादन्यत्र तु सः।

**टिप्पणिः** द्विपदं सूत्रम्। अनेन सूत्रेण कस्कादिगणे पठितानां शब्दानां इणः परस्य विसर्गस्य षकारः अन्यत्र तु सकारः।

*यथा व्यूढोरः क इत्यत्र विसर्गस्य सकारः। व्यूढोरस्कः इति रूपम्।*

**सूत्रम्- इणः षः ८।३।३९।**

इण उत्तरस्य विसर्गस्य षः पाशकल्पककाम्येषु परेषु।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण विसर्गस्य षत्वं विधीयते। पाशकल्पककाम्येषु परेषु इणः उत्तरस्य विसर्गस्य षः स्यात्।

*प्रियं सर्पिः यस्य सः प्रितसर्पिष्कः। प्रिय सु सर्पिस् सु इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति समासः। समासत्वात् सुपः लुक्। प्रियसर्पिस् । 'उरः प्रभृतिभ्यः कप्' इति कप्प्रत्ययः। सकारस्य रुत्वे विसर्गे च प्रियसर्पिः क। अत्र 'इणः षः' इति सूत्रेण विसर्गस्य षत्वे प्रितसर्पिष्क। विभक्तिकार्ये प्रिससर्पिष्कः इति रूपम्।*

**सूत्रम्- निष्ठा २।१।३६।**

निष्ठान्तं बहुव्रीहौ पूर्वं स्यात्।

**टिप्पणिः-** एकपदं सूत्रम्। अनेन सूत्रेण निष्ठान्तस्य शब्दस्य प्राक् प्रयोगः विधीयते। क्तप्रत्ययस्य क्तवतु प्रत्ययस्य च निष्ठा इति संज्ञा। निष्ठान्तं बहुव्रीहौ पूर्वं स्यात्।

*योगः युक्तः येन सः युक्तयोगः। 'अनेकमन्यपदार्थे' इति समासः। समासत्वात्सुपः लुक्। युक्तः इति क्तप्रत्ययान्तत्वात् निष्ठान्तत्वम्। अतः 'निष्ठा' इति सूत्रेण पूर्वप्रयोगः। विभक्तिकार्ये युक्तयोगः।*

**सूत्रम्-** **शेषाद्विभाषा ५।४।१५४।**

अनुक्तसमासान्तशेषात् बहुव्रीहेः कप् वा स्यात्।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण विकल्पेन कप् विधीयते। अनुक्तसमासन्तशेषाद् (यत्र समासान्तो बहुव्रीहौ नोक्तम् तत्र) बहुव्रीहेः कप् वा स्यात्।

*महत् यशः यस्य सः महायशस्कः, महयशाः वा। महत् सु यशस् सु इत्यलौकिकविग्रहः। 'अनेकमन्यपदार्थे' इति समासः। सुपः लुक्। 'आन्महतः समानाधिकरणजातीययोः' इत्यात्वे महायशस्। अत्र 'शेषाद्विभाषा' इति विकल्पेन कपि महायशस्क। सस्य रुत्वे विसर्गे च महयशः क। 'सोऽपदादौ' इति विसर्गस्य सत्वे महायशस्क। विभक्तिकार्ये महायशस्कः। कप्रत्ययस्याभावे महायशस्। 'अत्वसन्तस्य चाऽधातोः (६-४-१४)' इति उपधादीर्घे महायशास्। विभक्तिकार्ये सुलोपे रुत्वे विसर्गे च महायशाः इति रूपम्।*

इति बहुव्रीहिसमासप्रकरणम्।



# पठनप्रवर्तनानि

**१. सप्रमाणं समस्यत-**

१. चित्राः गावः यस्य सः।

२. दीर्घे सक्थिनी यस्य सः।

३. सु हृदयं यस्य सः।

४. उद्गतं काकुदं यस्य सः।

५. व्यूढं उरः यस्य सः।

६. युक्तः योगः यस्य सः।

**२. यथोचितं योजयत**

| **क** | **ख** |
|---|---|
| १. अन्तर्बहिर्भ्यां च लोम्नः | १. व्याघ्रपात्। |
| २. पादस्य लोपोऽहस्त्यादिभ्यः | २. अमित्रम्। |
| ३. दुर्हृद् | ३. सत्वम्। |
| ४. सोऽपदादौ | ४. षत्वम्। |
| ५. कस्कादिषु च | ५. अन्तर्लोमः। |

अथ समासप्रकरणम्



१.६

# षष्ठः पाठः

## द्वन्द्वसमासः

**सूत्रम्-** **चार्थे द्वन्द्वः २.२.२९।**

अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्वः।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण द्वन्द्वसामसः विधीयते। अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्वः। चत्वारः चार्थाः। समुच्चयः अन्वाचयः इतरेतरयोगः समाहारश्चेति। परस्परनिरपेक्षयोरेकस्मिन् अन्वयः समुच्चयः।

ईश्वरं गुरुं च भजस्व। अन्यतरस्यानुषङ्गिकत्वेन अन्वयः अन्वाचयः। यथा भिक्षामट, गां चानय। समुच्चये अन्वाचये च असामर्थ्यात् समासो न। मिलितानामन्वय इतरेतरयोगः। यथा धवखदिरौ। अत्र धवखदिरयोः परस्परसापेक्षित्वात् समासः। समूहः समाहारः। संज्ञापरिभाषम्। समाहारद्वन्द्वः एकवचनम्। नपुंसकं च भवति।

**सूत्रम्-** **राजदन्तादिषु परम् २-२-६१**

राजदन्तादिषु पूर्वप्रयोगार्हं परं स्यात्।

**टिप्पणिः-** द्विपदं सूत्रम्। 'उपसर्जनं पूर्वम्' इत्यनेन पूर्वप्रयोगाहं परं स्यादिति विधीयते। राजदन्तादिषु पूर्वप्रयोगार्हं परं स्यात्।

*दन्तानां राजा राजदन्तः। दन्त आम् राजन् सु इत्यलौकिकविग्रहः। 'षष्ठी' इति सूत्रेण समासः। समासत्वात्सुपः लुक्। अत्र राजदन्तादिषु परम् इति सूत्रेण राजन्शब्दस्य पूर्वप्रयोगे राजन् दन्त। 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे राजदन्त। सौ अनुबन्धलोपे रुत्वे विसर्गे च राजदन्तः।*

**वार्तिकम्- धर्मादिष्वनियमः।**

**टिप्पणिः-** धर्मादिविषयेषु (धर्मादिगणपठितशब्देषु) पूर्वप्रयोगकार्ये नियमो नास्ति। द्विपदं वार्तिकम्।

*धर्मः च अर्थश्च धर्मार्थौ अर्थधर्मौ वा । धर्म सु अर्थ सु इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासः। समासत्वात्सुपः लुक्। अत्र 'धर्मादिष्वनियमः' इत्यनेन पूर्वपदप्रयोगे अनियतत्वम्। सवर्णदीर्घे विभक्तिकार्ये च धर्मार्थौ। अर्थशब्दस्य पूर्वप्रयोगे अर्थधर्मौ इति।*

**सूत्रम्- द्वन्द्वे घि २-२-३२।**

द्वन्द्वे घिसंज्ञं पूर्वं स्यात्।

**टिप्पणिः-** द्विपदं सूत्रम्। अनेन सूत्रेण द्वन्द्वे घिसंज्ञं पूर्वं प्रयोक्तव्यमित्युच्यते। 'शेषो घ्यसखि' इति सूत्रेण घिसंज्ञा।

*हरश्च हरिः च हरिहरौ। हर सु हरि सु इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासे सुपः लुकि च हरहरि। अत्र 'द्वन्द्वे घि' इति सूत्रेण घिसंज्ञकस्य हरिशब्दस्य पूर्वप्रयोगे हरिहर। तस्मादौ विभक्तौ वृद्धौ हरिहरौ इति रूपम्।*

**सूत्रम्- अजाद्यदन्तम् २-२-३३।**

द्वन्द्वे अजादिः यः अजन्तशब्दश्च पूर्वं प्रयुज्यते।

**टिप्पणिः-** एकपदं सूत्रम्। अनेन सूत्रेण अजाद्यदन्तशब्दस्य पूर्वप्रयोगः विधीयते। अजादि च तत् अदन्तं च अजाद्यदन्तम्। स्वरादिः ह्रस्वाकारान्तः शब्दः द्वन्द्वे पूर्वं प्रयुज्यते।

*ईशः च कृष्णश्च ईशकृष्णौ। ईश सु कृष्ण सु इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासः। समासत्वात् सुपः लुक् । 'अजाद्यदन्तम्' इति सूत्रेण अजाद्यन्तस्य ईशशब्दस्य पूर्वप्रयोगे ईशकृष्ण। तस्मादौ विभक्तौ ईशकृष्णौ इति रूपम्।*

**सूत्रम्- अल्पाच्तरम् २-२-३४.**

द्वन्द्वसमासे अल्पाच्पदं पूर्वं प्रयुज्यते।

**टिप्पणिः–** एकपदं सूत्रम्। अनेन सूत्रेण अल्पाच्तरं पदं पूर्वं प्रयोक्तव्यम्।

*शिवश्च केशवश्च शिवकेशवौ। शिव सु केशव सु इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासे सुपः लुक्। अत्र अल्पाच्तरम् इति सूत्रेण अल्पाचः शिवशब्दस्य पूर्वप्रयोगे शिवकेशव। तस्मादौ विभक्तौ शिवकेशवौ इति रूपम्।*

**सूत्रम्- पिता मात्रा १.२.७०**

मात्रा सहोक्तौ पिता वा शिष्यते।

**टिप्पणिः-** द्विपदं सूत्रम्। मात्रा सहोक्तौ पिता वा शिष्यते ।

*माता च पिता च पितरौ, मातापितरौ वा। मातृ सु पितृ सु इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासः। समासत्वात्सुपः लुक्। मातृपितृ। अत्र 'पिता मात्रा' इति सूत्रेण पितृशब्दः शिष्यते। पितृ। तस्मादौ विभक्तौ 'ऋतो ङि सर्वनामस्थानयोः' इति सूत्रेण गुणे रपरत्वे च पितरौ इति रूपम्। एकशेषाभावे मातृपितृ। 'आनङ् ऋतो द्वन्द्वे' इति मातृशब्दस्य आनङि अनुबन्धलोपे मातान् पितृ। नलोपे औ विभक्तौ गुणे रपरत्वे च मातापितरौ।*

**सूत्रम्- द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्। २-४- २**

प्राण्यङ्गानां तूर्याङ्गानाम् सेनाङ्गानां च द्वन्द्वः एकवत् भवति।

**टिप्पणिः–** त्रिपदं सूत्रम्। अनेन सूत्रेण एकवद्भावः विधीयते। प्राण्यङ्गानां तूर्यङ्र्गानां च द्वन्द्वः एकवद् भवति।

*पाणी च पादौ च एषां समाहारः पाणिपादम्। पाणि औ पाद औ इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासः। समासत्वात् सुपः लुक्। पाणिपाद। 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' इति सूत्रेण एकवद्भावे सुप्रत्ययः। 'स नपुंसकम्' इति सूत्रेण नपुंसकत्वे अमि पूर्वरूपे च पाणिपादम्।*

*मार्दङ्गिकवैणविकम्। मार्दङ्गिकश्च वैणविकश्च अनयोः समाहारः मार्दङ्गिकवैणविकम्। मार्दङ्गिक सु वैणविक सु इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासे सुपः लुक्। तूर्याङ्गत्वात् द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् इति एकवद्भावे सुप्रत्यये 'स नपुंसकम्' इति नपुंसकत्वे अमि पूर्वरूपे च मार्दङ्गिकवैणविकम् इति रूपम्।*

*रथिकाश्वारोहम्। रथिकाश्च अश्वारोहाश्च एषां समाहारः रथिकाश्वारोहम्। रथिक जस् अश्वारोह जस् इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासः। समासत्वत्सुपः लुक्। सवर्णदीर्घे रथिकाश्वारोह।*

*सेनाङ्गवाचित्वात् 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' इति एकवद्भावे अमि पूर्वरूपे च रथिकाश्वारोहम् इति रूपम्।*

**सूत्रम्- द्वन्द्वाच्चुदषहान्तात्समाहारे ५-४-२०६**

चवर्गान्तात् दषहन्ताच्च द्वन्द्वात् टच् स्यात् समाहारे।

**टिप्पणिः-** द्वन्द्वात् चुदषहान्तात् समाहारे इति त्रिपदं सूत्रम्। अनेन सूत्रेण टच् स्यात् समाहारे।

*वाक् च त्वक् च अनयोः समाहारः वाक्त्वचम्। वाच् सु त्वच् सु इत्यलौकिकविग्रहः। 'चार्थे द्वन्द्वः' इति समासः। समासत्वात्सुपः लुक्। वाच् त्वच् । 'चो कुः' इति कुत्वे वाक्त्वच् । चवर्गान्तत्वात् 'द्वन्द्वाच्चुदषहन्तात्समाहारे' इति सूत्रेण टच्प्रत्यये वाक्त्वच् अ। विभक्तिकार्ये वाक्त्वचम्।*

*त्वच् च स्रक् चानयोः समाहारः त्वक्स्रजम्। त्वज् सु स्रज् सु इत्यलौकिकविग्रहे द्वन्द्वसमासे सुपः लुकि च त्वज्स्रज्। त्वच् शब्दस्य कुत्वे त्वक्स्रज्। 'द्वन्द्वाच्चुदषहान्तात्समाहारे' इति टच्प्रत्यये त्वक् स्रज। विभक्तिकार्ये त्वक्स्रजम्।*

*शमीदृषदम्। शमी च दृषद् चानयोः समाहारः शमीदृषदम्। शमी सु दृषद् सु इत्यलौकिकविग्रहः। द्वन्द्वसमासः। सुपः लुक्। दकारान्तत्वात् 'द्वन्द्वाच्चुदषहान्तात्समाहारे' इति टच्प्रत्यये शमीदृषद। विभक्तिकार्ये शमीदृषदम्।*

*वाक्त्विषम् । वाक् च त्विट् चानयोः समाहारः वाक्त्विषम्। वाच् सु त्विष् सु इत्यलौकिकविग्रहः। द्वन्द्वसमासः। सुपः लुक्। 'चो कुः' इति कुत्वे वाक् त्विष्। 'द्वन्द्वाच्चुदशहन्तात्समाहारे' इति टचि वाक्त्विष। विभक्तिकार्ये वाक्त्विषम्।*

*छत्रोपानहम्। छत्र सु उपानह् सु इत्यलौकिकविग्रहः। द्वन्द्वः। समासत्वात् सुपः लुकि छत्र उपानह्। गुणे छत्रोपानह्। हकारान्तात् 'द्वन्द्वाच्चुदषहान्तात्समाहारे' इति छत्रोपानह। विभक्तिकार्ये छत्रोपानहम्।*

समाहारे इति किम्? समाहारे एवायं टच्प्रत्ययः। प्रावृट् च शरद् च प्रावृट्शरदौ । अत्र समाहारत्वाभावात् न टच्।

इति द्वन्द्वप्रकरणम्।



## पठनप्रवर्तनानि

### सप्रमाणं समस्यत

१. दन्तानां राजा राजदन्तः।

२. शिवः च केशवः च शिवकेशवौ।

३. माता च पिता च पितरौ।

४. हरः च हरिः च हरिहरौ।

### यथोचितं योजयत

| क | | ख |
|---|---|---|
| १. राजदन्तादिषु परम् | - | ईशकृष्णौ |
| २. धर्मादिष्वनियमः | - | शिवकेशवौ |
| ३. अजाद्यदन्तम् | - | पितरौ |
| ४. अल्पाच्तरम् | - | राजदन्तः |
| ५. पिता मात्रा | - | अर्थधर्मौ |



# अभ्यासः

**कोष्ठात्समुचितमुत्तरं निर्धार्य लिखत-**

१. भूतपूर्वः इत्यत्र समासः केन सूत्रेण विधीयते?
(अव्ययं विभक्ति....इत्यादिना, चार्थे द्वन्द्वः, सह सुपा)

२. अव्ययीभावश्च इति सूत्रेण किं विधीयते?
(उपसर्जनस्य पूर्वत्वम्, नपुंसकत्वम्, पुल्लिङ्गत्वम्)

३. उपसर्जनसंज्ञा केन सूत्रेण विधीयते?
(उपसर्जनं पूर्वम्, प्रथमानिर्दिष्टं समास उपसर्जनम्, नाव्ययीभावादतोऽम्त्वपञ्चम्याः)

४. द्विगुश्च इति सूत्रेण का संज्ञा विधीयते?
(द्विगुसंज्ञा, अव्ययीभावसंज्ञा, तत्पुरुषसंज्ञा)

५. उपकृष्णम् इत्यस्य विग्रहः कः?
(कृष्णस्य समीपम्, कृष्णे समीपम्, कृष्णः समीपम्)

६. केन सूत्रेण बहुव्रीहिः समासः विधीयते?
( सप्तमीविशेषेण बहुव्रीहौ, शेषो बहुव्रीहिः, अनेकमन्यपदार्थे)

७. सोऽपदादौ इति सूत्रस्य उदाहरणं किम्?
( व्यूढोरस्कः, ऊढरथः, कण्ठेकालः)

८. चार्थे द्वन्द्वः इति सूत्रेण कः समासः विधीयते?
( बहुव्रीहिः, तत्पुरुषः, द्वन्द्वः)

९. पाणी च पादौ च एषां समाहारः..............।
(पाणिपादः, पाणिपादौ, पाणिपादम्)
१०. प्रातिपदिकस्य ह्रस्वविधायकं सूत्रं किम्?
(एकविभक्ति चापूर्वनिपाते, तत्रोपपदं सप्तमीस्थम्, गोस्त्रियोरुपसर्जनस्य)
११. समासे उपसर्जनं ................ प्रयोज्यम्।
(प्राक्, परम्, मध्ये)
१२. त्रिमूर्धः इत्यत्र समासः कः?
(द्वन्द्वः, तत्पुरुषः, बहुव्रीहिः)

**वाक्येन वाक्यद्वयेन वा उत्तरं लिखत-**

१. उपसर्जनविधायकं सूत्रं सोदाहरणं लिखत।
२. पञ्चगङ्गम् इत्यत्र केन सूत्रेण समासः विधीयते? कस्मिन्नर्थे?
३. द्वितीयातत्पुरुषसमासः केन सूत्रेण विधीयते? सोदाहरणं स्पष्टयत।
४. अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यमिति वार्तिकं विशदयत।
५. उत्तराः वृक्षाः इत्यत्र कुतः समासो न?
६. आदिवृद्धिविधायकं सूत्रं किम्? एकमुदाहरणं प्रदर्शयत।
७. किं नाम उपपदम्? विशदयत।
८. अर्धर्चः, अर्धर्चम् इति रूपद्वयं कथं सिद्ध्यति?
९. बहुव्रीहिसमासविधायकं सूत्रं किम्? एकमुदाहरणं प्रदर्शयत।
१०. व्याघ्रपाद् इतिवद् न भवति हस्तिपादः इति पदम्। कुतः?
११. अर्थधर्मौ, धर्मार्थौ । उभयमपि साधुः। कथम्?
१२. चार्थाः के?
१३. परमराजः इत्यत्र टच्प्रत्ययः केन सूत्रेण विधीयते?

१४. पञ्चवृत्तयः काः?

१५. धान्यार्थः इत्यत्र समासः कः? रूपं कथं सिद्ध्यति?

## सूत्राणि व्याख्यात

१. प्रथमानिर्दिष्टं समास उपसर्जनम्।

२. नस्तद्धिते।

३. तृतीया तत्कृतार्थेन गुणवचनेन।

४. दिक्संख्ये संज्ञायाम्।

५. तत्पुरुषः समानाधिकरणः कर्मधारयः।

६. कुगतिप्रादयः।

७. सप्तमीविशेषेण बहुव्रीहौ।

८. उद्विभ्यां काकुदस्य।

९. निष्ठा।

१०. अल्पाच्तरम्।

११. द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्।

१२. राजदन्तादिषु परम्।

१३. उपसर्जनं पूर्वम्।

१४. तृतीया तत्कृतार्थेन गुणवचनेन।

## पूरयत

१. समर्थः————।

२. उपसर्जनं————।

३. अव्ययीभावे————।

४. तृतीया तत्कृतार्थेन———।

५. कर्तृकरणे कृता————।

६. पञ्चमी————।

७. अर्धं————।

८. दिक्संख्ये————।

९. सप्तमी————।

१०. विशेषेण विशेष्येण———।

११. अर्धर्चाः————।

१२. शेषाद् ————।

१३. अन्तर्बहिभ्यां————।

१४. उरः प्रभृतिभ्यः————।

१५. राजदन्तादिषु————।

१६. पिता————।

१७. द्वन्द्वश्च————।

१८. द्वन्द्वे————।

१९. हलदन्तात्सप्तम्याः————।

२०. तत्पुरुषः समानाधिकरणः————।

**रूपं सप्रमाणं साधयत-**

१. वागर्थाविव

२. पञ्चगङ्गम्

३. भूतपूर्वः

४. अधिहरि

५. हरित्रातः

६. सप्तर्षयः

७. कुपुरुषः

८. त्रिरात्रम्।

९. पीताम्बरः

१०. महायशाः

११. शिवकेशवौ

१२. पाणिपादम्।

१३. मातापितरौ।

**सप्रमाणं समासकार्यं विशदयत।**

१. अधिगोपम्

२. राजपुरुषः

३. उपराजम्

४. निर्मक्षिकम्

५. कृच्छ्रादागतः

६. हरित्रातः

७. गोहितम्

८. अर्धपिप्पली

९. नीलोत्पलम्।

१० अहोरात्रम्।

११. महाराजः।

१२. जलजाक्षी।

१३. राजदन्तः।

१४ हरिहरौ।

१५. कुम्भकारः।

### समस्तं रूपं लिखत

१. कृष्णः च ईशः च।

२. माता च पिता च।

३. शङ्खुलया शण्डः।

४. कृष्णस्य समीपम्।

५. पञ्चानां गवां समाहारः।

६. प्राप्तो जीविकाम्।

७. द्वौ मूर्धानौ यस्य सः।

८. पाणी च पादौ च एषां समाहारः।

९. वाक् च त्वक् च अनयोः समाहारः।

१०. गवामक्षीव।

### यथोचितं योजयत-

| | क | | ख |
|---|---|---|---|
| १. | महाराजः | - | अव्ययं विभक्तिसमीप......... |
| २. | तृतीया | - | त्रेस्त्रयः |
| ३. | धान्येन अर्थः | - | चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः |
| ४. | त्रयोदश | - | आन्महतः समानाधिकरणजातीययोः |
| ५. | विष्णोः पश्चाद् | - | चार्थे द्वन्द्वः |
| ६. | रामकृष्णौ | - | कर्तृकरणे कृता बहुलम्। |
| ७. | एकविभक्ति चापूर्वनिपाते | - | अर्धं नपुंसकम्। |
| ८. | एकवद्भावं | - | अनेकमन्यपदार्थे |
| ९. | ऊढरथः | - | द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्। |
| १०. | अर्धपिप्पली | - | उपसर्जनसंज्ञा। |

साहित्यपाठपुस्तकात् समस्तपदानि चित्वा समासानुसारं पट्टिकां कुरुत।

# एककम्-२

# तर्कशास्त्रम्

### आमुखम्

सर्वेषामेव शास्त्राणामुपकारतया आन्विक्षिकीत्यपराभिधस्य न्यायशास्त्रस्य प्रसिद्धिः सुतरां प्रतिभाति। यथा स्मृतिपुराणेषु तस्य चतुर्दशविद्यास्थानानाम् अन्यतमत्वेन उक्तिः। यथा याज्ञवल्क्यस्मृतौ-

पुराणं न्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।।

विष्णुपुराणे यथा- अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्या ह्येताःचतुर्दश।।

अक्षपादापरनामकः भगवान् गौतमो मोक्षोपयोगितया 'प्रमाण प्रमेय.....' इत्यादीनि न्यायसूत्राणि निरमात्। महर्षिः कणादः 'अथातो धर्मं व्याख्यास्यामः' इत्यादीनि वैशेषिकसूत्राणि च। अनयोः पुनः शास्त्रयोरन्योन्योपकारकतया सम्मेलनेन नव्यन्यायशास्त्रस्य समुत्पत्तिरभूत् यद् इदानीं लोके तर्कशास्त्राभिधया व्यपदिश्यते।

अन्नंभट्टस्य तर्कसंग्रहः विश्वप्रसिद्धः। तस्य दीपिका इति व्याख्यानं प्रसिद्धमेव। तर्कसंग्रहः विद्यार्थिसंसत्सु च सुमहतीम् प्रथामभजत। तर्क्यन्ते प्रतिपाद्यन्ते इति तर्काः। द्रव्यादिपदार्थास्तेषां संग्रहः संक्षेपेण स्वरूपकथनं क्रियत इत्यर्थः।

### पठनाधिगमाः

तर्कसंग्रहस्य प्राधान्यमधिकृत्य लिखति।

कोष्ठात्समुचितमुत्तरं निर्धार्य लिखति।

अन्योन्यबन्धं ज्ञात्वा यथोचितं योजयति।

टिप्पणीः लिखति।

पीलुपाकवादिनां पिठरपाकवादिनां च मतभेदं ज्ञात्वा लिखति।

सुवर्णस्य तैजसत्वं स्थापयति।

सकारणं मङ्गलस्य समाप्तिसाधनत्वं ईश्वरसद्भावे प्रमाणत्वं च संसूच्य लिखति।

तमसः दशमद्रव्यत्वकल्पनां तन्निराकरणं च समर्थयति।





## प्रवेशकः

संघचर्चाद्वारा अधो निर्दिष्टां पट्टिकां पूरयत -

| बिरुदनाम | योग्यता | प्रतिपाद्य विषयः | जीवने उपयोगिता | कालदैर्घ्यंम् |
|---|---|---|---|---|
| स्नातकः (Graduate) | | | | |
| स्नातकोत्तरः (PG) | | | | |
| विद्यावारिधिः (Ph.D) | | | | |
| शिक्षाचार्यः (M.Ed.) | | | | |
| आयुर्वेदवैद्यबिरुदः (BAMS) | | | | |
| शिक्षाशास्त्री (B.Ed.) | | | | |



२.१

## प्रथमः पाठः

# तर्कसंग्रहदीपिका

## अनुबन्धचतुष्टयम्

**अधिकारी तु विषयः सम्बन्धश्च प्रयोजनम्।**
**शास्त्रारंभफलं प्राहुरनुबन्धचतुष्टयम्।।**

अधिकारी-अधीतव्याकरणकाव्यकोशः अनधीतन्यायशास्त्रः शास्त्रग्रहणधारणपटुः।

विषयः- द्रव्यादिसप्तपदार्थानां संक्षेपेण स्वरूपकथनं विषयः। अपि च प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि चान्तर्भवन्ति।

सम्बन्धः- बोध्यबोधकभावः। तेन यथार्थज्ञानसम्पादनम्।

प्रयोजनम् बालानां सुखेन अनायासेन पदार्थज्ञानबोधः।

### मंङ्गलवाद :

**तर्कसंग्रहः**- निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः।

**तर्कदीपिका- विश्वेश्वरं साम्बमूर्तिं प्रणिपत्य गिरां गुरुम्।**
**टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकाम्।**

**चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधित-कर्तव्यताकमिष्टदेवतानमस्कारलक्षणं मङ्गलं शिष्यशिक्षार्थं निबन्धश्चिकीर्षितं ग्रन्थादौ प्रतिजानीते।**

**ननु मङ्गलस्य समाप्तिसाधनत्वं नास्ति। मङ्गले कृतेऽपि कादम्बर्यादौ समाप्त्यदर्शनात्। मङ्गलाभावेऽपि किरणावल्यादौ समाप्तिदर्शनादन्वयव्यतिरेक- व्यभिचारादिति चेन्न। कादम्बर्यादौ विघ्नबाहुल्यात्समाप्त्यभावः। किरणावल्यादौ तु ग्रन्थाद्बहिरेव मङ्गलं कृतमतो न व्यभिचारः।**

**ननु मङ्गलस्य किं प्रमाणमिति चेत् । न। शिष्टाचारा-नुमितिश्रुतेरेव प्रमाणत्वात्। तथाहि मङ्गलं वेदबोधितकर्तव्यताकम् अलौकिकशिष्टाचारविशिष्टत्वात् दर्शादिवत्। भोजनादौ अतिव्याप्तिवारणायालौकिकेति। रात्रिश्राद्धादौ व्यभिचारवारणायावगीतेति। शिष्टपदं स्पष्टार्थम्। 'न कुर्यान्निष्फलं कर्म' इति जलताडनादेरपि निषिद्धत्वादिति।**

**व्याख्या** - विश्वेश्वरं विश्वस्य ईश्वरम् अम्बया सह वर्तते इति साम्बः सा मूर्तिः (शरीरं) यस्य तं साम्बमूर्तिम्। प्रणिपत्य नमस्कृत्य, गिरां - वाणीं गुरुं - विद्यागुरुं च नमस्कृत्य तर्कसंग्रहदीपिकां शिशूनां हितार्थं क्रियते इत्यर्थः।

चिकीर्षितस्य कर्तुं इष्टस्य ग्रन्थस्य तर्कसंग्रहनामकग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं- निर्गतः विघ्नः यस्याः सा निर्विघ्ना, निर्विघ्ना चासौ परिसमाप्तिः च निर्विघ्नपरिसमाप्तिः, तदर्थं निर्विघ्नपरिसमाप्त्यर्थं. शिष्टाचारानुमितश्रुतिः शिष्टाः वेदविहितकर्मानुष्ठातारः तेषाम् आचारः शिष्टाचारः, शिष्टाचरणे अनुमिता श्रुतिः शिष्टाचारानुमितश्रुतिः, तया बोधिता कर्तव्यता यस्मिन् तत् शिष्टाचारनुमितश्रुतिबोधितकर्तव्यताकम्।

मङ्गलस्य समाप्तिसाधनत्वं नास्ति इति पूर्वपक्षः। मङ्गले कृतेऽपि कादम्बर्यादौ समाप्त्यभावात्। मङ्गलाभावेऽपि किरणावल्यादौ समाप्तिदर्शनात्

च। कारणसत्वे कार्याभावः अन्वयव्यभिचारः। कारणाभावे कार्योत्पत्तिः व्यतिरेकव्यभिचारः च वर्तेते।

अत्रेदं समाधानम्। कादम्बर्यादौ विघ्नबाहुल्यात् समाप्त्यभावः। किरणावल्यादौ ग्रन्थाद्बहिरेव मङ्गलं कृतम्। अतो न व्यभिचारः। मङ्गलं सफलम्।

मङ्गलस्य सफलत्वे किं प्रमाणमिति चेत् न। शिष्टानाम् आचारात्। तथाहि मङ्गलं वेदबोधितकर्तव्यताकम् अलौकिकावगीताशिष्टाचारविषयत्वात् दर्शादिवत् इत्यनुमानेन।

| **पूर्वपक्षः** | **सिद्धान्तपक्षः** |
|---|---|
| मङ्गलं न समाप्तिं प्रति हेतुः। मङ्गलसत्वेऽपि कदाम्बर्यादौ समाप्त्यभावात्। मङ्गलाभावेऽपि किरणावल्यादौ समाप्तिदर्शनाच्च। | मङ्गलसमाप्तिं जनयति। विघ्नबाहुल्यात् कादम्बर्यादौ समाप्त्यभावः। ग्रन्थात् बहिरेव कृतमङ्गलत्वात् किरणावल्यादौ समाप्तिश्च। अतो उक्तदोषः न आपतति। |
| अन्वयव्यतिरेकव्यभिचारात् मङ्गलबोधकप्रमाणं च नास्ति। | मङ्गलं वेदबोधितकर्तव्यताकम् अलौकिकाविगीत शिष्टाचारविषयत्वात् दर्शादिवत् इति अनुमानं मङ्गलाचरणे प्रमाणम्। |

| | |
|---|---|
| कारणमस्ति कार्यं नास्ति।<br>कारणं नास्ति कार्यम् अस्ति। | अन्वयव्यभिचारः।<br>व्यतिरेकव्यभिचारः। |

## तमोवादः (तमसःदशमद्रव्यत्वकल्पनां निराकरणं च)

**तर्कसंग्रहः** **तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्मनांसि नवैव।**

**तर्कदीपिका** **ननु तमसो दशमद्रव्यस्य विद्यमानत्वात्कथं नवैव द्रव्याणि। तथाहि (तमः खलु चलं नीलं परापरविभागवत् प्रसिद्धद्रव्यवैधर्म्यान्नवेभ्यो भेत्तुमर्हति।) नीलं तमश्चलति इति बाधितप्रतीतिबलात् नीलरूपाधारतया क्रियाधारतया च द्रव्यत्वं तावत्सिद्धम्। तत्र तमसो आकाशादिपञ्चके न अन्तर्भावः, रूपवत्वात्। न वायौ, स्पर्शाभावात्। नापि तेजसि, भास्वररूपाभावात् उष्णस्पर्शाभावात्। नापि जले, शीतस्पर्शाभावात् नीलस्वरूपत्वात् च। नापि पृथिव्यां गन्धाभावात् स्पर्शरहितत्वाच्च। तस्मात् तमसो दशमद्रव्यत्वमिति चेत् न। तमसः तेजोऽभावरूपवत्वात्। यत्र यत्र तेजोऽभावः तत्र तत्र तमः। तस्मात् प्रौढप्रकाशकः तेजः, तेजसः सामान्याभावः तमः। तत्र नीलं तमश्चलति इति प्रत्ययो भ्रमः। अतो नव द्रव्याणि इति सिद्धम्। दीपापसरणक्रियया एव तत्र भानात्।**

**व्याख्या -** 'नीलं तमः चलति' इति वाक्यमस्ति। अत्र नीलरूपगुणात्मकत्वं चलनात्मकक्रियावत्वं च स्तः इत्यतः तमः दशमं द्रव्यमिति। अपि च तमसः रूपवत्वात् आकाशादिपञ्चके नान्तर्भवति। स्पर्शाभावात् वायौ नान्तर्भावः। भास्वररूपाभावात् उष्णस्पर्शाभावात् च तेजसि नान्तर्भावः। शीतस्पर्शाभावात् नीलरूपाश्रयत्वात् च न जलेऽन्तर्भावः। गन्धवत्वाभावात् न पृथिव्याम् अन्तर्भावः। अतः तमः दशमद्रव्यमिति पूर्वपक्षः।

अत्रेदं समाधानम्। तेजोऽभावः एव तमः। प्रौढप्रकाशकः तेजः। तेजसः सामान्याभावः तमः। तत्र नीलं तमः चलतीति प्रत्ययः भ्रमः। अतः नव द्रव्याणि इति सिद्धम्।

| तमसः दशमद्रव्यनिराकरणम्। | |
|---|---|
| **पूर्वपक्षः** | **सिद्धान्तपक्षः** |
| तमः दशमं द्रव्यम्। नीलरूपाधारतया चलनक्रियाधारतया च। तथा च उक्तेषु नवद्रव्येषु अनन्तर्भावम्। तमो दशमं द्रव्यम्। | रूपद्रव्यप्रत्यक्षे आलोकसहकृतचक्षुः कारणम्। तमसः रूपवत्वं चलनवत्वं च भ्रमात्मकः। न वास्तविकः। अतः अवश्यतेजोऽभावः एव तमः। |

## सुवर्णस्य तैजसत्वस्थापनम्।

**तर्कसंग्रहः - उष्णस्पर्शवत्तेजः। तद् द्विविधं नित्यमनित्यं च। नित्यं परमाणुरूपम्। अनित्यं कार्यरूपम्। पुनस्त्रिविधं - शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके। इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति। विषयश्चतुर्विधः। भौम-दिव्य-उदर्य- आकरजभेदात्। भौमं वह्न्यादिकम्। अबिन्धनं दिव्यं विद्युदादि। भुक्तस्य परिणामहेतुरुदर्यम्। आकरजं सुवर्णादिः।**

**तर्कदीपिका- तेजसः विषयं विभजते- ननु सुवर्णं पार्थिवं पीतत्वात् गुरुत्वात् हरिद्रादिवत् इति चेत् न। अत्यन्तानलसंयोगे सति घृतादौ द्रवत्वनाशदर्शनेन जलमध्यस्थघृतादौ तन्नाशदर्शनेन च असति प्रतिबन्धाके पार्थिवद्रव्यत्वनाशाग्निसंयोगे सति अनुच्छिद्यमानद्रवत्वाधिकरणत्वेन पार्थिवत्वानुपपत्तेः। तस्माद् पीतद्रवत्वनाशप्रतिबन्धकतया द्रवद्रव्यान्तरासिद्धौ नैमित्तिकद्रवत्वाधिकरणतया जलत्वानुपपत्तेः।तस्मात्सुवर्णं तैजसमिति सिद्धम्।**

**व्याख्यानम्-** अत्यन्तानलसंयोगे सति घृतादौ द्रवत्वनाशः संभवति। किन्तु जलमध्यस्थे घृतादौ द्रवत्वनाशदर्शनं संभवति। असति प्रतिबन्धके पार्थिवद्रवत्वनाशाग्निसंयोगयोः कार्यकारणभावावधारणात्। सुवर्णस्य अत्यान्तानलसंयोगे अपि न नाशः। पार्थिवस्य तु अत्यन्तानलसंयोगे नाशः। जलस्यापि अत्यन्तानलसंयोगेन विनाशः। सुवर्णस्य रूपवत्तया वाय्वादिषु अनन्तर्भावः। तस्मात् सुवर्णस्य तैजसत्वसिद्धिः।

| सुवर्णस्य तैजसत्वम् | |
|---|---|
| **पूर्वपक्षः** | **सिद्धान्तपक्षः** |
| सुवर्णं पार्थिवं पीतत्वात् गुरुत्वात् च हरिद्रावत्। | सुवर्णं तैजसम्। असति प्रतिबन्धके अत्यन्तानलसंयोगे सति पार्थिवद्रव्यनाशः। अतो न सुवर्णं पार्थिवम्। शीतस्पर्शाभावात् न जलीयं, रूपवत्वात् न वायवीयम्। तथा च न आकाशादिपञ्चकम्। अतः अवशिष्टतया सुवर्णं तैजसम्। |

## ईश्वरवादः

**तर्कसंग्रहः-** ज्ञानाधिकरणमात्मा। स द्विविधः- जीवात्मा, परमात्मा चेति। तत्र ईश्वरः सर्वज्ञः परमात्मा एक एव ।जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च।

**तर्कदीपिका-** नन्वीश्वरस्य सद्भावे किं प्रमाणम्? न तावत् प्रत्यक्षम्। तद्धि बाह्यम् आभ्यन्तरं वा। नाद्यम् अरूपिद्रव्यत्वात्। नान्त्यम् आत्मसुखादिष्वतिरिक्तत्वात्। नाप्यनुमानम् इत्यनुमानेन ईश्वरः सिध्यति लिङ्गाभावात् इति चेन्न। नाप्यागमः तदस्तिबोधकागमाभावात्। अत्र उच्यते "क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवत्"। उपादानम्- समवायिकारणम्। सकलपरमाण्वादिसूक्ष्मदर्शित्वात् सर्वज्ञत्वम्। "यः सर्वज्ञः सः सर्ववित्"। इत्याद्यागमोऽपि तत्र प्रमाणम्।

**व्याख्या-** ईश्वरस्य सद्भावे किं प्रमाणम्? न हि प्रत्यक्षं प्रमाणम्। ईश्वरस्य प्रत्यक्षाभावात्। प्रत्यक्षं द्विविधम्। बाह्यप्रत्यक्षम् आभ्यन्तरप्रत्यक्षं चेति। रूपत्वाभावात् न बाह्यप्रत्यक्षम्। आत्मसुखादिव्यतिरिक्तत्वात् नाभ्यन्तरप्रत्यक्षम्। अनुमानेन ईश्वरः अस्तीति वक्तुं शक्यत इति पूर्वपक्षः।

अत्रेदं समाधानम्। अनुमानेन ईश्वरः अस्तीति समर्थयति। तद्यथा क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवत् इति। उपादानगोचरा-परोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वम्। उपादानं समवायिकारणम्। सकलेषु परमाणुषु सूक्ष्मदर्शित्वात् सर्वज्ञत्वम्। 'यः सर्वविद्' इत्यागमोऽपि ईश्वरस्य सद्भावे प्रमाणम्।

| **ईश्वरानुमानम्** | |
|---|---|
| **पूर्वपक्षः** | **सिद्धान्तपक्षः** |
| जगत्कर्ता ईश्वरः नास्ति। तद्बोधक-प्रमाणाभावात्। वेदाः प्रमाणमिति चेत् ईश्वरोच्चरितत्वात् अन्योन्याश्रयदोषः। | क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवत् इत्यनुमानेन ईश्वरः सिद्ध्यति। यः सर्वविद् इत्यागमोऽपि अत्र प्रमाणम्। |

## पाकप्रक्रिया

**तर्कसंग्रहः- रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च। अन्यत्र पाकजं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतम् अनित्यम्।**

**तर्कदीपिका- पाकस्तेजसंयोगः। तेन पूर्वरूपं नश्यति। अत्र परमाणुरेव पाकः, न द्व्यणुकादौ। आमपाकनिक्षिप्ते घटे परमाणुषु रूपान्तरोत्पत्तौ श्यामघटनाशे तेजःसंयोगोऽसमवायिकारणम्। अदृष्टादिकं निमित्तकारणम्।**

**द्व्यणुकादिरूपे कारणरूपसमवायिकारणमिति पीलुपाकवादिनो वैशेषिकाः। पूर्वघटस्य नाशं विनैव अवयविनि अवयवेषु परमाणुपर्यन्तेषु च**

युगपत् रूपान्तरोत्पत्तिरिति पिठरवादिनो नैयायिकाः। अत एव पार्थिवपरमाणुरूपादिकं अनित्यम् इत्यर्थः। अन्यत्र जलादौ इत्यर्थः। नित्यगतमिति परमाणुगतमित्यर्थः। अनित्यगतं द्व्यणुकादिनिष्ठमित्यर्थः। रूपादिचतुष्टयमुद्भूतं प्रत्यक्षम् अनुद्भूतमप्रत्यक्षम्। उद्भूतत्वं प्रत्यक्षत्वप्रयोजको धर्मः। तदभावोऽनुद्भूतत्वम्।

**व्याख्या-** पाको नाम विजातीयतेजःसंयोगः। तेन पूर्वरूपं नश्यति। रूपान्तरम् उत्पद्यते। पाकः परमाणुषु संभवति। घटस्य पाकनिष्पत्तिपर्यन्तं द्व्यणुकादिरूपेण रक्तघटोत्पत्तिः। तत्र परमाणवः समवायिकारणम्। तेजस्संयोगः असमवायिकारणम्। अदृष्टादिकं निमित्तकारणम्। वैशेषिकाः पीलुपाकवादिनः। पिठरम् इत्यस्य समूहः इत्यर्थः। नैयायिकाः पिठरवादिनः। पीलु इत्यस्य अणुरित्यर्थ;। पूर्वघटस्य नाशं विनैव परमाणुपर्यन्तेषु युगपत् रूपान्तरोत्पत्तिरिति ते (नैयायिकाः) वदन्ति। अत एव पार्थिवपरमाणुषु रूपकादिकमनित्यम्।

| पीलुपाकवादः(वैशेषिकाणाम्) | पिठरपाकवादः (नैयायिकानाम्) |
| --- | --- |
| पीलुषु (परमाणुषु) एव पाकः।<br>विजातीयतेजसंयोगात् (पाकात्)<br>१. पूर्वगुणनाशः।<br>२. परमाणुपर्यन्तं विच्छित्तिः।<br>३. परमाणूनां पुनः संयोजनम्।<br>४. उत्तरगुणोत्पत्तिः। | अवयवेषु अवयविनि च युगपत्पाकः। |



## पठनप्रवर्तनानि

१. परमाणुसद्भावे पीलुपाकः पिठरवादः च।

२. सुवर्णं तैजसम् इत्यत्र कारणानि कानि?

अधोनिर्दिष्टे विषये सिद्धान्तपक्षस्थापनार्थम् अतिव्याप्त्यव्याप्त्यादि दोषरहितं उदाहरणान्तरम् अवगत्य कक्ष्यायां प्रस्तौतु।

१. मङ्गलवादः।

२. तमोवादः।

३. सुवर्णस्य तैजसकल्पनम्।

४. ईश्वरवादः।

५. पाकप्रक्रिया।



# अभ्यासः

**कोष्ठात् समुचितमुत्तरं निर्धार्य लिखत-**

१.न्यायदर्शनस्य आचार्यः कः

(गौतमः, पाणिनिः, कालिदासः)

२.तर्कसंग्रहस्य कर्ता कः?

( अन्नंभट्टः, अप्पय्यदीक्षितः, नारायणभट्टपादः)

३.तर्कसंग्रहः कस्मिन् विभागे अन्तर्भवति।

(न्याये, व्याकरणे, ज्योतिषे)

४.तर्कसंग्रहे कति पदार्थाः सन्ति?

(दश, नव, पञ्च)

५.दीपिका नाम व्याख्या कस्य ग्रन्थस्य भवति?

(तर्कसंग्रस्य, सिद्धान्तकौमुद्याः, महाभारतस्य)

६.तमः जले न अन्तर्भवति। कस्मात्?

(उष्णस्पर्शाभावात्, शीतस्पर्शाभावात्, भास्वररूपत्वात्)

७.ईश्वरसद्भावे अधोनिर्दिष्टेषु किं प्रमाणमङ्गीक्रियते?

(प्रत्यक्षम्, अनुमानम्, उपमानम्)

८.पिठरवादिनः के?

(मीमांसकाः, वैशेषिकाः, नैयायिकाः)

९.सुवर्णं कस्मिन् अन्तर्भवति?

(पृथिव्याम्, तेजसि, वायौ)

१०. नीलं तमः चलति इति प्रतीतिः केवलं ———भवति।
(भ्रमः, संशयः, यथार्थज्ञानम्)

## यथोचितं योजयत


| क | ख |
|---|---|
| १. अव्याप्तिः | १. न्यायदर्शनम्। |
| २. सुवर्णम् | २. मङ्गले सत्येऽपि समाप्त्यदर्शनम्। |
| ३. कादम्बरी | ३. लक्ष्यमात्रावृत्तित्वात्। |
| ४. किरणावली | ४. तैजसम्। |
| ५. गौतमः | ५. ग्रन्थाद्बहिः मङ्गलमाचरितम्। |

## टिप्पणीं लिखत

अधिकारी, विषयः, सम्बन्धः, प्रयोजानम्, सुवर्णस्य तैजसत्वम्।

## विशदयत

१.मङ्गलस्य समाप्तिसाधनत्वं नास्ति।
२.तमसः दशमद्रव्यकल्पनम्।
३.ईश्वरस्य सद्भावे किं प्रमाणम्?
४.पाको नाम तेजस्संयोगः।



## एककम्- ३

# दर्शनपरिचयः

**आमुखम्**

दृश्यते अनेन इति दर्शनम्। दर्शनानां परिचयः छात्रैः अवगतः भवेत्। भारतीयदर्शनेषु वेदान्तः नितरां श्रेष्ठः। वेदान्ततत्त्वप्रतिपादकानाम् आचार्याणां जीवनचरितज्ञानं तेषां योगदानं च छात्रैः परिचितं भवेत्। तदर्थं तेषां चरितं तथा वेदान्तदार्शनिकस्य नारायणगुरोः निर्वृतिपञ्चकं च अधिकृत्य अस्मिन् एकके प्रतिपादितम् अस्ति।



## पठनाधिगमाः

- भारतीयदर्शनानां स्वरूपम् अवगत्य लिखति।
- केरलीयानां दार्शनिकपरम्परां ज्ञात्वा वर्गीकृत्य च लिखति।
- नवोत्थाने दार्शनिकानां योगदानम् अवगत्य लिखति।
- नारायणगुरोः निर्वृतिपञ्चके प्रतिपादितानि तत्त्वानि ज्ञात्वा लिखति।
- निर्वृतिपञ्चकस्य आशयम् अधिकृत्य टिप्पणिं लिखति।
- केरलीयदार्शनिकानां ग्रन्थान् कालदेशान् च अधिकृत्य पट्टिकां करोति।
- ग्रन्थकारानुसारं ग्रन्थान् वर्गीकरोति।

३.१

## प्रथमः पाठः

# कतिपयाः केरलीयदार्शनिकाः



### प्रवेशिका

कक्ष्यायां शङ्कराचार्यम् अधिकृत्य संस्कृतचलच्चित्रस्य भागान् विंशति - निमेषं यावत् प्रदर्शयति। छात्राः संघे स्थित्वा चर्चां कुर्वन्तु।

सूचनाः-

- आचार्यस्य जन्म, कालः पितरौ च।
- शैक्षणिककार्यक्रमः।
- सामाजिकप्रतिक्रियाः उन्नमनं च।
- प्रसिद्धाः आशयाः।
- कृतयः।
- देहत्यागः।
- इदानीन्तनकाले अस्याश्यस्य साङ्गत्यम्।
- चर्चानन्तरम् अध्यापकः क्रोडीकरोति।

प्रपञ्चस्य रहस्यं, आत्मनः अस्तित्वमित्यादीन् गहनतरान् विषयान् अन्विष्यमाणाः ऋषिवर्याः बहवः अनादिकालादारभ्य भारते अवर्तन्त। तैः यदुपस्थापितं तदेव दर्शनमिति व्यवह्रियते। आस्तिकनास्तिकभेदेन प्रथमं दर्शनं द्विविधम्। नास्तिकेषु चार्वाक-जैन- बौद्धाः तथा आस्तिकेषु सांख्य- योग - न्याय -वैशेषिक -मीमांसा-वेदान्ताः षड् च विद्यन्ते।

केरलेष्वपि अनेके दार्शनिकाः आसन् । एकोनविंशतितमे शताब्दौ तदनन्तरं च केरलस्य नवोत्थाने कृतप्रयत्नाः अनेके संस्कृतज्ञाः चासन्। दर्शनानां पठनं पाठनं च केरलेषु अपि प्रचलिताः आसन्। केरलेषु कोलत्तुनाड् कटत्तनाट्, कोषिक्कोट्, कोडुङङ्ल्लूर् , तृप्पूणित्तुरा, चम्पकश्शेरि, पन्तलम्, कूडल्लूर् , पय्यूर् मेल्पत्तूर् , देशमङ्गलादिषु अनेकेषु प्रदेशेषु दार्शनिकाः तथा शिक्षाकेन्द्राणि च अवर्तन्त।सामाजिकस्तरे प्रगतिं समानेतुं बहुप्रयत्नं कृतवत्सु तेषु केचन अत्र प्रतिपाद्यन्ते। दार्शनिकवाङ्मये प्रसिद्धानां तेषां पठनेन तस्मिन्नवसरे केरलेषु रूढमूलान् आचारान् नीतिबोधान् अनुष्ठानभेदांश्च अवगन्तुं शक्यते। निस्तन्द्रप्रयत्नैः केरलराज्यस्य शिक्षासंस्कृतिकादिमण्डलेषु इतरराज्यापेक्षया अतीव श्रेष्ठा अनल्पा च प्रगतिः अधुनापि अनुभववेद्या वर्तते।

### श्री ब्रह्मानन्दशिवयोगी (१८५२-१९२९)



केरलीयनवोत्थाने अतिविशिष्टं स्थानमलङ्करोति ब्रह्मानन्दशिवयोगी। सः दुराचारान् अन्धविश्वासान् च दूरीकर्तुम् अधिकं प्रयत्नं चकार। प्रायेण यूनां मध्य एव सः तस्याशयान् प्रकाशयामास।

पालक्काट् जिल्लायां कोल्लङ्कोट् ग्रामे १८५२ तमे क्रिस्तब्धे आगस्त् मासे स

जनिम् अलभत। काराट्ट् गोविन्दन् मेनोन् इत्यासीदस्य नाम। १९०७ तमे दीक्षां स्वीकृत्य ब्रह्मानन्दशिवयोगीति नाम्ना प्रसिद्धोऽभूत्। दीक्षास्वीकारपर्यन्तं संस्कृताध्यापकपदवीं च अलञ्चकार। न केवलं विग्रहाराधनां किन्तु ईश्वरमपि सः निराकरोति स्म। सः 'मोक्षप्रदीपम्' इति मासिकीं संस्थाप्य तस्याशयादर्शान् प्रचारयामास। युवकेषु युक्तिचिन्तां न्यायबोधं च प्रज्वाल्य आदर्शनिष्ठं जीवितं कर्तुं प्रेरयामास। योगासनाय प्रेरयन् सः 'आनन्दमतम्' प्राचारयत्। योगाचार्यः स महात्मा इतरान् दार्शनिकान् अतिशेते। आनन्दसूत्रम्, आनन्दविमानम्, आनन्ददर्शनम्. सिद्धानुभूतिः राजयोगः इत्यादयः तस्य प्रसिद्धग्रन्थाः भवन्ति।

## श्रीविद्याधिराजपरमभट्टारकः चट्टम्पिस्वामी (१८५३-१९२४)




श्री चट्टम्पिस्वामिकल् इति कीर्तितोऽसौ केरलीयनवोत्थाने भागभाक् तथा समूहपरिष्कर्ता च आसीत्। न केवलं सांस्कृतिकमण्डले अपि तु साहित्ये दर्शने राजनैतिकेऽपि अस्य प्रभावं वर्तते। साम्प्रदायिकरीत्या वेदाध्ययनस्य अधिकारविषये कालानुसृताः पद्धतिः च स्वामिना प्रोत्साहिता। सर्वे धर्माः एकम् एव लक्ष्यीकुर्वन्ति इति तस्य अभिमतः । विविधेषु प्रदेशेषु अनेके सुहृदः सतीर्थ्याः च तस्य आसन्।

चट्टम्पिस्वामी क्रिस्त्वब्दे १८५३ तमे आगस्तमासे २५ तिथौ तिरुवनन्तपुरस्य दक्षिणे भागे कोल्लूर् ग्रामे जनिमलभत। अस्य माता नङ्कम्मा, पिता वासुदेवशर्मा च। स्वामिनः नाम तु अय्यप्पः इत्यासीत्। परं सर्वे कुञ्चन् इति व्यपदिशन्ति। प्राथमिकशिक्षा समीपस्थात्

ब्राह्मणगृहात् बहिः स्थित्वा श्रुत्वा तेन समार्जिता। तस्य जिज्ञासामवगम्य मातुलेन रामन्पिल्लैमहाशयस्य पाठशालायां प्रवेशितः।तत्र कक्ष्यायां नायकेत्यस्मात् तेन 'चट्टम्पि' इति पदम् उपलब्धम्। पुनः तैक्काडु अय्यास्वामिकल् सकाशात् योगविद्या अधिगता। कालान्तरे कोल्लूर्मठे कर्मकरत्वेन तथा नेय्याटिन्करायां मुद्रितकार्यालये प्रमाणपत्रलिपिकरत्वेन उद्योगः तेन कृतः। स्वामिनाथदेशिकात् तमिल्भाषामधीत्य सः तिरुनेल्वेलीतः सुब्बजटापाठीनामकात् पण्डितात् वेदवेदान्तादीन् अधीतवान्। पुनः बहुविधविद्यासु पारंगतोऽभूत्। अत एव अस्य विद्याधिराजेति नाम लब्धम्। एवं दक्षिणभारते सर्वत्र स निरन्तरम् अटन्नवर्तत। यात्रामध्ये १९२४ तमे मेय्मासे पञ्चमीतिथौ पन्मनदेशे दिवंगतोऽयं महाशयः।

अस्य 'सर्वमतसारस्यम्' 'ब्रह्मतत्वानिर्भासम्' 'अद्वैतपञ्जरम्', 'अद्वैतचिन्तापद्धतिः', 'चिदाकाशलयः' इत्यादिग्रन्थाः अद्वैतस्य प्रभावं प्रकटयन्ति। कालिकव्यतियानेन आदिशंकरस्य अद्वैतमेव तेन आविष्कृतम्। अन्ये न्यायमीमांसाग्रन्थाः तथा स्तोत्रग्रन्थाः च तेन कृताः। अस्य अनेकेषु सतीर्थ्येषु प्रसिद्धाः आसन् श्रीनारायणगुरुः नीलकण्ठतीर्थपादस्वामी, तीर्थपादपरमहंसादयः।

## श्रीनारायणगुरुदेवः (१८५४- १९२८)



सतां संगमं महनीयं मन्यमाना एते महानुभावाः तेषाम् आयोजनेन प्रभाषणशतेन च यूनः अत्यर्थम् उद्बोधितवन्तः। श्रीनारायण गुरुः तिरुवनन्तपुरस्य उत्तरभागे चेम्पषन्त्यां जातः। नारायणेति यद्यपि तस्य नाम आसीत् तथापि तं नाणुम् इति आह्वयन्ति। माता कुट्टियम्मा पिता माटनाशान् च। अस्य

माटनाशान् च। अस्य रामन्वैद्यन् कृष्णन्वैद्यन् इति द्वौ मातुलौ अभवताम्। एते अस्य शिक्षापालने प्रसिद्धौ।

मातुलस्य कृष्णन्वैद्यन्महाभागस्य निर्देशेन कुम्मप्पल्लिरामन्पिल्ला आशान्महाभागस्य सकाशात् नारायणेन संस्कृतमधीतम्। पुनः सः पाठशालां संस्थाप्य बालेभ्यः संस्कृताभ्यासनं ददौ। अत एवास्य नाणु- आशान् इति नाम अभवत्। पुनः सर्वथा इतस्ततः पर्यटन् दक्षिणभारते प्रायशः केरल-तमिल-प्रदेशेषु ज्ञानसम्पादनं तस्य प्रचारणं च कृतवानासीत्। कन्याकुमार्याः समीपे मरुत्वगिरौ स तपश्चकार। अनन्तरमेव श्रीनारायणगुरुस्वामीति कीर्तिरुपलब्धा। सामाजिकपरिवर्तनाय अश्रान्तं कृतप्रयत्नः सः सामान्यजनानां कृते देवालयपाठशालादयः स्थापितवान्। सर्वत्र तस्य कर्मक्षेत्रे वेदान्त एव प्रतिपाद्यः। अस्य कृतिषु अधिकतया प्रकीर्तिताः स्तोत्रग्रन्थाः। दर्शनमालेति संस्कृतदार्शनिकग्रन्थश्च अनेन रचितः। ब्रह्मविद्यापञ्चकम्, निर्वृतिपञ्चकम्, श्लोकत्रयी, वेदान्तसूत्रम् आदयो ग्रन्थाः संस्कृते गुरुणा विरचिताः।

श्रीनारायणगुरुस्वामी केरलीयसमूहे प्रगतिम् आनेतुं कृतप्रयत्नेषु प्रमुखः अभवत्। सामाजिकासमत्वस्य तीव्रप्रतियोगी अभूत्सः। तत्समये विद्यमानायाः वर्णावर्ण- व्यवस्थितेः निरासः अद्वैतदर्शनस्य प्रयोगसाधुतया प्रतिष्ठितः। एकमानववादः अद्वैताधिष्ठिताध्यात्मिकचिन्ता चास्य नवीनपद्धतिः आसीत्।

## श्रीनीलकण्ठतीर्थपादः (१८७१-१९२१)



चट्टम्पिस्वामिनः शिष्यः केरलीयसामूहिकपरिष्कर्तृषु एकः भवति श्री नीलकण्डतीर्थपादः। संस्कृतभाषायां शास्त्रेषु च निष्णातः सः वेदान्तपण्डितेषु अन्यतमः आसीत्। तस्य यशः पाश्चात्यदेशेष्वपि कीर्तितम्। आसेतुहिमाचलं सञ्चरन् स सर्वत्र प्रभाषणं कृतवानासीत्। तथापि सः आत्मानं सदापि विद्यार्थिभावेनैव प्रकाशयति स्म इति प्रसिद्धम्।

१८७१ तमे नीलकण्ठतीर्थपादः मुवाट्टुपुषायां तिरुमाराटिग्रामे अजायत। माता वालानिक्काट्ट् कल्याणियम्मा, पिता नीलकण्ठपिल्ला च। तस्य पितरौ धनिकौ आस्ताम्। पिता तथा ज्येष्ठसहोदरौ च विद्वांसः आसन्। तृप्पूणित्तुरा माध्यमिकविद्यालयात् विजेता सः नूतनशिक्षापद्धतिं परित्यज्य संस्कृताध्ययने तत्परोऽभवत्। वैद्यशास्त्रे, मन्त्रशास्त्रे, व्याकरणे, तर्के, च सः निष्णातत्वमाप । चट्टम्बिस्वामिनः शिष्यत्वेन अद्वैतवेदान्ते प्रवीणोऽभवत्। सः शास्त्रपठने देशाटने ग्रन्थपारायणे कवितानिर्माणे च तत्परः आसीत्। अद्वैतस्तबकम् , वेदान्तार्थशतकम्, आनन्दमन्दाकम् , आराध्यपादपञ्चकम् इत्यादयोऽस्य कृतयः। अद्वैतवेदान्तस्य प्रचारकत्वेनाटनं कृतवान् नीलकण्ठतीर्थपादः १९२१ तमे वर्षे करुनागप्पल्यां यशःशरीरोऽभवत्।

## श्री वाग्भटानन्दगुरुः (१८८५-१९३९)



आंगलेयशासनकाले उत्तरकेरले विद्यमानेषु सामाजिकपरिष्कर्तृषु अन्यतम आसीत् वाग्भटानन्दगुरुः। तेन 'आत्मविद्यासंघम्' इति एकं सुशिक्षितानां सघं सज्जीकृतम्। अस्य प्रयत्नेन एव समाजे परिवर्तनं सक्रियाप्रगतिश्च अजायत। ऊरालुङ्कल् लेबर् कोनट्राक्ट कोपरेटीव् सोसैटि तस्य चोदनयैव आपतितम्। केरलेषु प्रचलितायाः अधार्मिकतायाः अनाचारस्य च स तीव्रविमर्शकः अभवत्। सामान्यजनानां प्रबोधनाय आश्रान्तपरिश्रमः स्वसंघद्वारा गुरुणा सर्वदा कृतः।

वाग्भटानन्दगुरोः जन्म कण्णूर्जिल्लायां पाट्यं ग्रामे क्रिस्त्वब्दे १८८५ तमे अभूत्। तस्य माता चीरु तथा पिता कोरन्कुरुक्कल् च। वयलेरि कुञ्चिक्कण्णन् इति आसीदस्य यथार्थनाम। प्राथमिकशिक्षा संस्कृतपण्डितस्य पितुः सकाशादेव स्वीकृता। पुनः परम्पत्तु रैरुनायर् तथा कोरप्पन्गुरुक्कल्प्रभृतिभ्यो तर्कव्याकरणादीनि शास्त्राणि अभ्यस्तानि। १९०५ मध्ये कोषिक्कोट्नगरे प्राप्तः सः ब्रह्मसमाजद्वारा सामाजिकपरिष्करणाय प्रयत्नमकरोत्। तस्मिन्नेव समये कारप्परम्प्देशे दरिद्राणां शिक्षणाय 'तत्वप्रकाशिका' नाम विद्यालयं स्थापितवान् । महात्मा सः ब्रह्मानन्दस्वामिनः प्रभाषणं श्रुत्वा तस्मिन्नाकृष्टः तस्य शिष्योऽभवत्। ततः एव अस्य वाग्भटानन्द इति नाम अभवत्। पुनः ब्रह्मानन्दशिवयोगिना साकं विसंवादेन सः स्वयं नूतनं पन्थानं स्वीकृतवान्।

सः 'आत्मविद्या', 'आत्मविद्यालेखनमाला' इति च प्रसिद्धं कैरलीग्रन्थद्वयं निर्ममे यस्मिन् अद्वैतमेव प्रतिपाद्यत्वेन वर्तते। संस्कृते 'आत्मविद्यामङ्गलम्' 'योगामृतम्' इत्यादयः ग्रन्थाः तेन रचिताः।

## श्री आगमानन्दस्वामी (१८९६-१९६१)



स्वामिविवेकानन्देन प्रतिष्ठितायां श्रीरामकृष्णाश्रमसंस्थायां विद्यमानः केरलीयः ऋषिवर्यः आसीत् श्री आगमानन्दः। आदिशङ्कराचार्यस्य जन्मस्थाने कालटिदेशे अद्वैताश्रमं संस्थाप्य अद्वैतचिन्ताः प्रचारयन्नवर्तत। पञ्चवर्षपर्यन्तेन कठिनेन प्रयत्नेन तस्याश्रमस्याङ्गीकारः उपलब्धः (१९४७ तमे वर्षे)। बहुकालं यावत् सः स्वस्य प्रभाषणेन प्रसिद्धीकरणेन च मध्यकेरले सर्वत्र सञ्चरन् जनानुद्बोधयति स्म।

१८९६ मध्ये करुनागप्पल्लिदेशे भूजातस्यास्य महात्मनः नाम कृष्णन्नम्यातिरीत्यासीत्। मावेलिक्करा अनन्तपुरी, मदिराशी इत्यादिभ्यः प्रदेशेभ्यः विद्याभ्यासं लब्ध्वा चेङ्ङन्नूर्देशे कस्यचन विद्यालयस्य प्रधानाध्यापकपदवीं प्राप। किन्तु श्रीरामकृष्णाश्रमप्रवर्तनेषु व्यापृतः सः प्रधानाध्यापकपदवीम् अत्यजत्। १९२५ वत्सरं केरलीयानाम् अविस्मरणीयं भवति यतः वैक्कंसत्याग्रहे अस्य महाशयस्यापि भागभागित्वमभवत्। गान्धिजीमहोदयः वैक्कंसत्याग्रहसमये केरलेष्वागतवान्। तदानीं शङ्कराचार्येण प्रणीतो भवति अयं ग्रन्थः 'शङ्करस्मृतिः' इत्युक्त्वा तुण्डन्तुरुत्तिनम्यातिरिः इति कश्चन पण्डितम्मन्यः अवर्णानां देवालयप्रवेशनं निषिद्धमिति गान्धिनः पुरतः समर्थयितुं बहुप्रयत्नं चकार। किन्तु केलप्पजि (के. केलप्पन्) महाशयस्य निर्देशेन संस्कृते आङ्गलभाषायां

च प्रवीणः कृष्णन्नम्प्यातिरिः शङ्करस्मृतिं परिशोधितवान्। तेन समर्थितं यद् इयं स्मृतिः न शङ्कराचार्यस्य। अस्याम् शङ्करस्मृतौ भाषाशैल्यां व्याकरणे च स्खालित्यान्यासन् इति कारणात्। गान्धिजिः अस्य युवपण्डितस्य उभयभाषापाण्डित्यमङ्गीचकार। प्रशंसितवान् च। सनातनधर्मप्रचाराय सः महात्मा कालटिदेशे न केवलं श्रीरामकृष्णाद्वैताश्रमं किन्तु ब्रह्मानन्दोदयम् उच्चविद्यालयम्, आयुर्वेदचिकित्सालयं, गुरुकुलं, श्रीशङ्करकलाशालां च स्थापितवान्। श्रीशङ्करभक्तः अयं महात्मा १९६१ वर्षे कालटिदेशे एव समाधिं प्राप। स महात्मा संस्कृते 'धर्मः' इति ग्रन्थं विरच्य सनातनधर्ममधिकृत्य जनान् प्राचोदयत् । अस्य प्रभाषणपरम्परा 'वीरवाणी' इति नाम्ना कैरल्यां समाहृत्य प्रसिद्धीकृता। 'वेदप्रामाण्यम्' 'केरलत्तिन्टे भावि' इति ग्रन्थद्वयमप्यस्ति अस्य महात्मनः कीर्तिस्तम्भरूपेण।

### क. पदार्थाः

रूढमूलाः - रूढिं प्राप्ताः
प्रगतिः - प्रशस्तिः
निष्णातः - समर्थः
चोदना - प्रेरणा
सकाशः - समीपः

### ख. विग्रहः

दर्शनम् - दृश्यते अनेनेति दर्शनम्।
कृतप्रयत्नाः - कृतः प्रयत्नः येषां ते।
अद्वैतम् - न द्वैतम् अद्वैतम्।

### ग. धातुपरिचयः

१. अवर्तन्त - वृतु वर्तने लङ् आत्म. प्र.पु.ब.व.।
२. अभूत् - भू सत्तायाम् लुङ् पर. प्र.पु.ए.व.।
३. अत्यजत् - त्यज् त्यागे पर. लङ् प्र.पु.ए.व.।
४. चकार - डुकृञ् करणे पर. लिट् प्र.पु.ए.व.।

### घ. पदच्छेदः

प्रसिद्धोऽभूत् - प्रसिद्धः + अभूत्
कीर्तिरुपलब्ध्वा - कीर्तिः + उपलब्ध्वा
चोदनायैव - चोदनाय + एव
प्रचारयन्नवर्तत - प्रचारयन् + अवर्तत



# पठनप्रवर्तनानि

## I यथोचितं योजयत।

| | | |
|---|---|---|
| १. | ब्रह्मानन्दशिवयोगी | १८९६ |
| २. | चट्टम्पिस्वामिकल् | १८५० |
| ३. | श्रीनारायणगुरुदेवः | १८५२ |
| ४. | नीलकण्ठतीर्थपादः | १८५३ |
| ५. | वाग्भटानन्दगुरु; | १८७१ |
| ६. | आगमानन्दस्वामी | १८५४ |
| | | १८८५ |

## II ग्रन्थकारानुसारं ग्रन्थान् वर्गीकुरुत

ग्रन्थकारः- ब्रह्मानन्दशिवयोगी, चट्टम्पिस्वामिकल्, श्रीनारायणगुरुदेवः। निलकण्ठतीर्थपादः, वाग्भटानन्दगुरुः, आगमानन्दस्वामी।

ग्रन्थाः- निर्वृतिपञ्चकम्, सर्वमतसारस्यम्। आत्मविद्यालेखनमाला, अद्वैतस्तबकम्, आनन्दमन्दारम्, आनन्दविमानम् , अद्वैतचिन्तापद्धतिः, वेदान्तसूत्रम्, सिद्धानुभूतिः, धर्मः, ब्रह्मतत्वनिर्भासम्, ब्रह्मविद्यापञ्चकम्, राजयोगः, वेदप्रामाण्यम्, वीरवाणी।

## छ . नूतनपदानि अवगत्य स्वकीये शब्दकोशे निवेशयन्तु।

३.२

## द्वितीयः पाठः

# निर्वृतिपञ्चकम्



### प्रवेशिका

भारतीयदर्शनेषु प्रमुखं भवति उत्तरमीमांसा अथवा वेदान्तः। द्वैताद्वैतविशिष्टाद्वैतादिभेदाः अस्य दर्शनस्य यद्यपि विद्यन्ते तथापि अद्वैतसिद्धान्तस्यैव परमं प्राधान्यम्। युक्तिभिः प्रमाणैश्च दर्शनान्तराणि निरस्य अद्वैतसिद्धान्तं स्थापितवान् जगद्गुरुः श्रीमच्छङ्कराचार्यभगवद्पादाः।

प्रस्थानत्रयं वेदान्तदर्शनस्य मूलं भवति। 'ब्रह्मसूत्रम्' '् भगवद्गीता' उपनिषदश्च प्रस्थानत्रये अन्तर्भवन्ति। 'ब्रह्मसत्यं जगन्मिथ्या' ' जीवो ब्रह्मैव नापरः' इति दर्शनस्यास्य सारसंग्रहः । 'प्रज्ञानं ब्रह्म' 'अहं ब्रह्मास्मि' 'तत्त्वमसि' 'अयमात्मा ब्रह्म' इति चत्वारि महावाक्यानि वेदान्तदर्शन-प्रतिपादकानि भवन्ति।

केरलीयः भवति श्रीशङ्कराचार्यः। भारतेषु सर्वत्रापि अद्वैतवेदान्तिनः सन्ति। केरलेषु अपि वेदान्तदर्शनाकृष्टाः वेदान्तवनसञ्चारिणः बहवः दार्शनिकाः सञ्जाताः सन्ति। तेषु प्रातःस्मरणीयःभवति श्रीनारायणगुरुः। सः महाशयः

अधःस्थितानाम् समुद्धरणाय धार्मिकतां स्थापयितुं च नितान्तं प्रायतत। अद्वैतचिन्ताप्रसारणेन आध्यात्मिकचिन्तां प्रायोगिकतया स्वजीवितेन प्रकटयितुं सः सन्नद्धोऽभवत्। तस्याभिमतः सिद्धान्त अद्वैतमेवेति तस्य 'दर्शनमाला' इत्यादिभ्यः ग्रन्थेभ्योऽवगन्तुं शक्यते।

१९१६ तमे वर्षे तिरुवण्णामलायाम् आगतः श्रीगुरुदेवः रमणमहर्षिम् अपश्यत्। रमणमहर्षिणा अनुभूतं निर्वृतिम् अधिकृत्य नारायणगुरुणा प्रणीतमिदं निर्वृतिपञ्चकम्।

**इत्यादि वादोपरतं महान्तम्**
**प्रशान्तगम्भीरनिजस्वभावाम्।**
**शोणाचले श्रीरमणं निरीक्ष्य**
**प्रोवाच नारायणसंयमीन्द्रः।।**

प्रशान्तगम्भीरस्वभावः संयमीन्द्रः नारायणः भेदवादोपरतं महान्तं श्रीरमणमहर्षिं शोणाचले दृष्ट्वा लिखितं भवति निर्वृतिपञ्चकम्।

निर्वृतिः निरन्तरं स्वानुभूतं सुखम्। को नाम निवृत्तिः? मोक्ष एव निर्वृतिः। को नाम मोक्षः? बन्धविमुक्तिरेव मोक्षः। को नाम बन्धः? जन्मजरारोगमरणाद्यनर्थपुत्रसंसारसंबन्धः बन्धः। यस्मान्निवृत्तिः मोक्षः - आत्मज्ञानम्। बहूनि सन्ति इति चिन्ता। यथार्थतः वस्तु एकमेव इति ज्ञानमेव मोक्षम् इति। परमपुरुषार्थो मोक्षः। आत्मानं सर्वावरणभङ्गरूपं मोचनं निर्वृतिरिति उच्यते।

**१. नाम-जाति- देश-वयोभिः भिन्नाः भवन्ति नराः। तेनैव कारणेन समाजे जनानां मिथः स्पर्धा, तद्वारा महायुद्धानि अपि जायन्ते। अतः ईदृशानां वादानाम् उपशमः एव मनुष्यैः प्राप्तव्यः। एतामवस्थां प्राप्तस्य योगिनः एव निर्वृतिः अथवा आत्मसाक्षात्काररूपो मोक्षो भवति। अयमेवात्र प्रथमश्लोकेन सूच्यते।**

**को नाम देशः का जातिः**
**प्रवृत्तिः का कियद्वयः**
**इत्यादि वादोपरति-**
**र्यस्य तस्यैव निर्वृतिः।।१।।**

अन्वयः- कः नाम देशः जातिः का प्रवृत्तिः का वयः कियत् इत्यादि वादोपरतिः यस्य तस्य एव निर्वृतिः।

अर्थः- को नाम देशः?- कमप्यागतं दृष्ट्वा प्रथमतः क्रियमाणः प्रश्नः। तव जन्मदेशः कः? वसुधैवकुटुम्बकम् इति मन्यमानानां देशभेदविषयकः प्रश्नो नावश्यकः। का जातिः? मनुष्याणां मनुष्यत्वं जातिः। अतो विवेकशालिनाम् आगतं प्रति जातिविषयकः प्रश्नः असङ्गतः भवति। प्रवृत्तिः का? आगतस्य जीवनोपायम् अधिकृत्य क्रियमाणोऽयं प्रश्नः। सर्वैः स्वधर्मः परिपालनीयः इति सिद्धान्ते निरर्थक एवायं प्रश्नः।

कियद्वयः? आत्मा न जायते, न म्रियते। शरीरस्य आत्मात्वं नास्ति इति गुरूपदेशेन प्रबुद्धस्य परं प्रति वयोविषयकः प्रश्नः कथं सम्भवेत्? इत्यादि वादोपरतिः- एवमादीनां निरर्थकानां वादानां सर्वदा वर्जनं यस्य भवति तस्यैव निर्वृतिः भवेत्।

उपरतिः- शमनम्।

वादोपरतिः यस्य - वादोपरतिर्यस्य

इति आदि- इत्यादि

तस्य एव- तस्यैव

२. **“न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन।**
**नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि।।”**

**इति गीताकारस्य वचनम्। श्लोकेऽस्मिन् ब्रह्मणि स्थिरस्य सकलक्रियाकारके क्रियाफलरहितत्वं च सूचयति। द्वितीयश्लोके इममेवाशयं स्पष्टतरं व्यनक्ति।**

**आगच्छ गच्छ मा गच्छ**
**प्रविश्य क्व नु गच्छसि**
**इत्यादि वादोपरति-**
**र्यस्य तस्यैव निर्वृतिः।।२।।**

अन्वयः- आगच्छ गच्छ मा गच्छ प्रविश्य क्व नु गच्छसि इत्यादि वादोपरतिः यस्य तस्य एव निर्वृतिः।

अर्थः- आगच्छ- स्वसमीपम् आगच्छन्तं प्रति आगच्छ इत्याह्वानं निरर्थकमेव।
तद्वत् प्रस्थितं प्रति गच्छ इति नियोगः किमर्थम्?
मा गच्छ- गमनाय प्रस्थितं प्रति गमनप्रतिषेधो निष्फल एव।
प्रविश्य- द्वारेण अन्तःप्रविशन्तं प्रति प्रवेशविधिः किमर्थम्?
क्व नु गच्छसि- प्रस्थितं प्रति कं देशं प्रति गमनम् उद्दिष्टम् । अत्र वासे कः प्रतिबन्धः? इति प्रश्नः न आवश्यकः इत्यादि वादोपरतिः यस्य भवति तस्यैव निर्वृतिः भवेत्। आत्मा देशकालाद्यनवच्छिन्नः इत्यतः एतादृशाः प्रश्नाः न सङ्गताः।

आगच्छ- आङ् + गम्लृ गतौ - पर- लोट्- म.पु.ए
गच्छ- गम्लृ + गतौ पर- लोट्- म.पु.ए
मा इति निषेधार्थवाचकः।

३. **यद्यपि द्वितीयश्लोकेन ब्रह्मण्युपरतस्य सकल कर्तृक्रिया- क्रियाफलासङ्गत्वं सूचितं तथाऽपि तमर्थं द्रढयितुं अहमकर्ता अहमभोक्ता इति अकर्तृत्व- अभोक्तृत्वस्वरूपं ब्रह्म अवबोधयितुं च तृतीयश्लोकः आरभ्यते।**

**क्व यास्यसि कदाऽऽगतः**
**कुत आयासि कोऽसि वै।**
**इत्यादि वादोपरति-**
**र्यस्य तस्यैव निर्वृतिः।।३।।**

अन्वयः- क्व यास्यसि कदा आयातः कुतः आयासि कः असि वै इत्यादि वादोपरतिः यस्य तस्यैव निर्वृतिः।

अर्थः- क्व यास्यसि - त्वं कुत्र गच्छसि प्रस्थितं प्रति कं देशमुद्दिश्य तस्य गमनमिति प्रश्नो वृथा। तस्य ज्ञानेन प्रश्नकर्तुः किमपि प्रयोजनं नास्ति। यत्- यस्मात् कारणात्। आयातः- अत्र त्वम् आगतः। तदहं ज्ञातुमिच्छामि इति शेषः। कस्यचिदागमनेन किमपि कारणं स्यादेव। तत् तेनैव वक्तुं योग्यम्। तत्र प्रश्नोऽनुचितः। कुतः आयासि- त्वं कस्मात् देशादागच्छसि? (पूर्वदेशवियोगपूर्वकः उत्तरदेशसंयोगः गमनस्य फलम्) आगतेन वियुक्तो देशः कः इति प्रश्नः सङ्गतो न भवति। तव गमनेन न किमपि फलमस्ति। कोऽसि वै- त्वं कः भवसि? दर्शनेन एव आगतस्य स्वरूपज्ञानं संभवेदेव। तद् अधिकं चेत् तेनैव प्रकटयितुमुचितम्। अतः प्रश्नोऽयं नावश्यकः। इत्यादि वादोपरतिः यस्य भवति तस्यैव निर्वृतिः स्यात्।

वै इति श्लोकपूरणार्थम् उपयुज्यमानमव्ययं भवति। आत्मज्ञाने सति तव मम इत्यादि भेद न सम्भवति। (युष्मदस्मत्प्रत्ययगोचरत्वं न भवति)

**४. तृतीयश्लोकेन ब्रह्मणि सकलक्रियारहितत्वम् अस्ति इति सुव्यक्तं स्थापितम्। अत्र पूर्वपक्षः।**

**तयोरेकः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति। इति मुण्डकोपनिषद् वचनानुसारेण क्रियारहितत्वेऽपि अहं त्वमित्यादि ज्ञानविषयिणौ प्रत्यगात्मप्रपञ्चौ। तयोः परस्पराभ्यासेनैव लोके व्यवहरन्ति जनाः। परस्परविरुद्धाविमौ परमार्थदशायाम् अविरुद्धौ। अतः तमः प्रकाशवत् अत्यन्तविरुद्धयोः प्रत्यगात्मप्रपञ्चत्वे अविरुद्धत्वं स्थापयितुं चतुर्थः श्लोकः आरभ्यते।**

**अहं त्वं सोऽयमन्तर्हि**
**बहिरस्ति न वास्ति वा**

**इत्यादि वादोपरति-**
**र्यस्य तस्यैव निर्वृतिः।।४।।**

अन्वयः- अहं त्वं सः अयम् अन्तः हि बहिः अस्ति न वा अस्ति वा इत्यादि वादोपरति यस्य तस्यैव निर्वृतिः।

अर्थः- अहं त्वं सः अयम्- आत्मानमुद्दिश्य अहमिति शब्दः प्रयुज्यते। प्रतिपत्तारमुद्दिश्य त्वमिति शब्दः प्रयुज्यते। दृश्यमानयोर्द्वयोः दूरवर्ती सः इति शब्देन । निकटवर्ती अयमिति शब्देन च निर्दिश्यते। सर्वोऽयं व्यवहारः आत्मैवेदं सर्वमिति पारमार्थिकज्ञानाभावे संभवति। अतः साधकस्य तादृशव्यवहारवर्जनमेव समुचितं भवति। अन्तः- गृहादिम् उपाधिम् अधिष्ठाय अन्तर्भागे इति व्यवहारः क्रियते।

बहिः- बहिर्भागे इति व्यवहारोऽपि सोपाधिकः। आत्मा तु सत्स्वरूपो निरूपाधिकश्च।

अस्ति वा नास्ति वा- 'नासतो विद्यते भावो , नाभावो विद्यते सतः' इति वचनेन सत् सदेव असद् असदेव इति बोध्यते। एवं सति भावाभावविषयप्रश्नो निरास्पदः। इत्यादि वादोपरतिः यस्य भवति तस्यैव निर्वृतिः स्यात्।

सः अयम्- सोऽयम्

बहिः अस्ति- बहिरस्ति।

वा अस्ति - वास्ति।

अस्ति- अस भुवि पर - लट् प्र.पु ए।

५. **द्वितीयतृतीयश्लोकाभ्याम् आत्मनः अकर्तृत्व- अभोक्तृत्वस्वरूपं व्याख्यातम्। संप्रति हि आत्मनि सजातीय- विजातीयस्वगतभेदत्वं च निरस्यति। "द्वा सुवर्णा सयुजाः सहायः" "द्वाविमौ पुरुषौ लोके क्षरश्चाक्षरः एव च" इत्यादीनि श्रुतिस्मृतिवाक्यानि व्याख्याय कुतर्कैः आत्मनि भेदं व्याचक्षाणां तार्किकादिद्वैतिनां मतनिरासः पञ्चमश्लोकेन क्रियते।**

**ज्ञाताज्ञातसमः स्वान्य-**
**भेदशून्यः कुतो भिदा**
**इत्यादि वादोपरति-**
**र्यस्य तस्यैव निर्वृतिः।।५।।**

अन्वयः- ज्ञाताज्ञातसमः स्वान्यभेदशून्यः भिदा कुतः इत्यादि वादोपरतिः यस्य तस्य एव निर्वृतिः।

अर्थः- ज्ञाताज्ञातसमः- अहं ज्ञाताज्ञातसमो भवति। अहं त्वन्यदेशशून्यो भवामि। एवं स्थिते भिदा कुतो भवति? ज्ञानं, सत्ता, ज्ञेयम् इति त्रिपुटी मिथ्यैव। आत्मा केवलज्ञानरूपः। एवं स्थिते यः कोऽपि अहं ज्ञानेषु अज्ञानेषु च तुल्यां दृष्टिं वहामि इति नैव वदेत्। अज्ञस्येव तादृशो व्यवहारः स्यात्। शरीराद्युपाधिकृतः स्वान्यभेदः। निरूपाधिकस्य आत्मनः एकत्वं सुव्यवस्थितम्। भेदनिषेधपरः कुतो भिदा इति प्रश्नः। इत्यादिवादोपरतिः यस्य भवति तस्य निर्वृतिः स्यात्।

निरर्थकान् लौकिकान् वादान् साकल्येन वर्जयित्वा आत्मविद्याविषयकः शास्त्रीयो विचारः कर्तव्य इति निर्वृतिपञ्चकेन समुद्बोध्यते।



## पठनप्रवर्तनानि

१. वेदान्तदर्शने प्रतिपादकानि तत्त्वानि कानि? एकैकमाधारीकृत्य चर्चां कुरुत।

सूचनाः- चत्वारि वाक्यानि- एकैकस्यार्थः- वेदान्तदर्शनस्य सारः।

२. अहं, त्वं, सः अयम् इत्यादिभिः पदैरुद्दिष्टः आशयः कः इति चर्चां कुरुत।

३. आगच्छ, गच्छ, मा गच्छ, गच्छसि इत्यादीनि पदानि वेदान्तदृष्ट्या निरर्थकानि। कुतः इति चर्चां कुरुत।

४. निर्वृतिपञ्चकम् इत्यस्याशयं विशदयत।

५. क्वा यास्यसि कदाऽऽगतः कुत आयासि कोऽसि वै इत्यादि वादोपरतिर्यस्य तस्यैव निर्वृतिः । श्लोकममुं व्याख्यात।



# अभ्यासः ।

**क. लघुटिप्पणीर्लिखत**

१. भारतीयदर्शनस्वरूपम्।

सूचनाः- आस्तिकम्, नास्तिकम् प्रधानाचार्याः चिन्तापद्धतयः- प्रधानकृतयः।

२. केरलीयदार्शनिकाः ।

सूचनाः- दार्शनिकविभागाः- चिन्तापद्धतयः- प्रधानकृतयः सामाजिकस्तरे तेषां स्थानम्।

३.प्रस्थानत्रयम्।

सूचना- ग्रन्थाः- प्रतिपाद्यविषयाः- कर्तारः व्याख्यातारश्च।

४. निवृत्तिपञ्चकाधारेण निवृतिमधिकृत्य लिखत।

**ख. संगोष्ठी**

पाठभागमधिकृत्य केरलीयनवोत्थाने दार्शनिकानां भागधेयम् अधिकृत्य संगोष्ठीं प्रचालयन्तु।

**ग. निर्दिष्टाभ्यासः**

सूचनानुसारं पाठभागान्तर्गतानां दार्शनिकानां शैक्षिककार्यक्रमान् तथा सामाजिकसेवनं च इतरग्रन्थातः अवगत्य लिखतु।

सूचना प्राथमिकशिक्षा संस्कृतशिक्षा, उन्नतशिक्षा, दार्शनिकता, समाजसेवनानि प्रसिद्धग्रन्थाः।

## एककम्-४

# ज्योतिश्शास्त्रम्।

### आमुखम्

साङ्गं वेदमधीतव्यमिति सम्प्रदायविदां मतम्। वेदाङ्गस्य शिक्षा-कल्प-निरुक्त-व्याकरण-ज्योतिष- छन्दांसि इति षडङ्गानि सन्ति। वेदपुरुषस्य नेत्रत्वेन ज्योतिशास्त्रं प्रकल्पितम्। शास्त्रस्य प्राधान्यसूचकं वाक्यं भवति- 'ज्योतिषामयनं चक्षु'रिति।

ज्योतिश्शास्त्रं संहिता, गणितं होरेति स्कन्धत्रयात्मकं भवति।

एवं हि वराहसंहितायाम् उक्तम्–

ज्योतिःशास्त्रमनेकभेदविषयम्
स्कन्धत्रयाधिष्ठितम्।
तत्कात्स्न्योपनयस्य नाम मुनिभिः
सङ्कीर्त्यते संहिता।।
तन्त्रेऽस्मिन् गणितेन या ग्रहगति-
स्तन्त्राभिधानस्त्वतो।
होरान्योऽङ्गविनिश्चयश्च कथितः
स्कन्धस्तृतीयोऽपरः।।



## पठनाधिगमाः

१. ज्योतिश्शास्त्रस्य परिचयं ददाति।

२. ग्रहाणां विषये भारतीयसङ्कल्पं विशदयति।

३. नवग्रहाणां नामानि वदति।

४. द्वादशराशीन् विशदयति, नामानि लिखति च।

५. नक्षत्राणि कानि इति वदति।

६. मासं विशदयति।

७. वाराणां नामानि वदति।

# ४.१

## प्रथमः पाठः

# ज्योतिषामयनं चक्षुः।



**प्रवेशकः**

वराहमिहिरः क्रिस्तोः परं षष्ठे शतके (6th Centuary A.D) जीवन् आसीत्। आदित्यदासतनयस्य तस्य जन्म उज्जयिनीनगरे अभवत्। सिद्धान्तशाखायां 'पञ्चसिद्धान्तिका', होरायां 'बृहज्जातकम्', संहितायां 'बृहत्संहिता' च तेन रचिताः प्रमुखग्रन्थाः। आधुनिककालेऽपि मानवसमुदायस्य वैद्यशास्त्रे रत्नशास्त्रे विवाहानुकूल्यादिविविधव्यवहारमेखलासु ज्योतिश्शास्त्रस्य सुमहत् प्रयोजनं दृश्यते।

**गुरुपरम्परा** -ज्योतिशास्त्राचार्याः अनेके सन्ति। आर्यभट-भास्कर-ब्रह्मगुप्त-वराहमिहिरादयो तेष्वग्रिमाः। आर्यभटस्य 'आर्यभटीयम्' प्रथमः ज्योतिःशास्त्रग्रन्थः इति केषाञ्चन विदुषां मतम्। 'सिद्धान्तशिरोमणी' 'लीलावती' च भास्कराचार्यस्य गणितशास्त्रज्ञानस्य मकुटरत्नं भवति। तथैव प्रथिते स्तः ब्रह्मगुप्तविरचितः 'ब्रह्मस्फुटसिद्धान्तः' वराहमिहिरविरचितं 'होराशास्त्रञ्च'।

केरलीयाः प्रमुखाः ज्योतिशास्त्रपण्डिताः आसन् नीलकण्ठसोमयाजिनः, सङ्गमग्राममाधवः, शङ्करनारायणः, तलक्कुलत्तु भट्टतिरिप्रभृतयः। सङ्गमग्राममाधवेन आविष्कृतं 'वेण्वारोहम्', हरिदत्तस्य 'परहितगणितम्', वटश्शेरिपरमेश्वरन्नम्पूतिर्या विरचितं 'दृग्गणितम्', पुतुमनसोमयाजिना रचिता 'करणपद्धतिः' च अद्यापि शास्त्राभिज्ञैः नितरामाद्रियते।

द्वादशराशिषु स्थितानां नवग्रहाणम् अश्विन्यादीनां नक्षत्राणां स्थितिमधिकृत्य शास्त्रेऽस्मिन् चिन्त्यते।

**द्वादशराशयः**- वृत्तात्मकोऽयं प्रपञ्चः एव शास्त्रेऽस्मिन् राशिचक्रत्वेन कल्पितः। राशिचक्रस्य द्वादशभागेष्वेकस्य राशिरिति संज्ञा। राशयः द्वादश। ते च- १. मेषः, २. वृषभः, ३. मिथुनम्, ४. कर्कटः, ५. सिंहः, ६, कन्या, ७. तुला, ८. वृश्चिकः, ९. धनुः, १०, मकरः, ११. कुम्भः, १२. मीनः इति।

मेषात् मीनराशिपर्यन्ताः राशयः मासक्रमेण कथ्यन्ते। सूर्यः मेषराशिस्थः चेत् मेषमासः वृषभराशिस्थः चेत् वृषभमासः इत्येवं क्रमः।

**सूर्याद्याः नवग्रहाः।**

भारतीयज्योतिश्शास्त्रं भौमकेन्द्रीकृतत्वेन कल्पितम्। सूर्याद्याः नवग्रहाः वृत्तात्मके राशिचक्रे भूमिं प्रदक्षिणीकरोति इति कल्पनया शास्त्रचिन्ता प्रवर्तते। अस्याः कल्पनायाः साङ्गत्यं तु मनुष्यः भूमौ वसति इति तथा भौमसमयक्रमः भूमिमाश्रयति इति च यावत्। नवग्रहाः इमे सूर्यः, चन्द्रः, कुजः, बुधः, गुरुः, शुक्रः, शनिः, राहुः, केतुश्च।

**नमस्सूर्याय सोमाय मङ्गलाय बुधाय च।**
**गुरुशुक्रशनिभ्यश्चराहवे केतवे नमः।।**

सूर्यस्य अर्कादीनि नामान्तराणि बहूनि विद्यन्ते। सोमश्चन्द्रः, मङ्गलो कुजः, राहुस्सर्पिः, शिखी केतुः, बुधः चन्द्रसुतः, गुरुर्बृहस्पतिः, शनिर्मन्दः च। सूर्यः त्रिंशद्दिनैः राशिमेकं तीर्त्वा राश्यन्तरं संक्रमति। योऽयं संक्रम इति प्रोच्यते। सूर्यस्य राशितरणकालं मासमेकं गणयति। मासद्वयं ऋतुसंज्ञकम्। ऋतवः षट्। वसन्तः, ग्रीष्मः, वर्षः, शरत्, हेमन्तः शिशिरः च।

| ऋतुक्रमः | मासद्वयम् |
|---|---|
| वसन्तः | मेषः, वृषः च, |
| ग्रीष्मः | मिथुनः, कर्कटः च, |
| वर्षः | सिंहः, कन्या च, |
| शरत् | तुला, वृश्चिकः च, |
| हेमन्तः | धनुः, मकरः च, |
| शिशिरः | कुम्भः, मीनः च। |

ऋतुत्रयम् अयनं जनयति। अयने द्वे उत्तरायणं दक्षिणायनं च। मकराद्याः षट् मासाः उत्तरायणकालः। कर्कटकाद्याः षण्मासाः दक्षिणायनकालः।

**नक्षत्राणि-** आदिप्रजापतेःदक्षस्य सप्तविंशतिः कन्यकाः ज्योतिश्शास्त्रे नक्षत्वेन परिकल्प्यन्ते। नक्षत्राणि यथा- १. अश्विनी २. भरणी ३. कृत्तिका ४. रोहिणी ५. मृगशीर्षः ६. आर्द्रा ७. पुनर्वसुः ८. पुष्यः ९. आश्लेषः१०. मखः११. पूर्वफाल्गुनी १२. उत्तरफाल्गुनी १३. हस्तम् १४. चित्रा १५. स्वाति १६. विशाखा १७. अनुराधा १८. ज्येष्ठा १९. मूलम् २०. पूर्वाषाढा २१.उत्तराषाढा २२. श्रावणः २३. श्रविष्टा २४. शतभिषक् २५. पूर्वभाद्रपदा २६. उत्तरभाद्रपदा २७. रेवती च।

**वारक्रमः**

एकस्मिन् राशौ सूर्योदयादारभ्य नवग्रहाः राशितरणं कृत्वा सञ्चरन्ति। तथा दिने निमेषे काष्ठा कलादिसूक्ष्मसमयेष्वपि नवग्रहाणाम् ईदृशं प्रक्रमणम् अनुस्यूतं सम्भवति। एवं दिनस्यारम्भसमये यः ग्रहः आगच्छति तद्दिनं तद्ग्रहस्य नाम्नि प्रथितम् । एवं सप्ताहस्य प्रथमस्य दिनस्यारम्भे सूर्यः, द्वितीयदिनस्यारम्भे चन्द्रः ततो कुजः, ततः बुधः, ततः क्रमेण गुरुश्शुक्रश्शनैश्चराश्च। एवं तेषां दिनानां रविवारः, चन्द्रवारः, कुजवारः, बुधवारः, गुरुवारः, शुक्रवारः, शनिवारश्चेति वारक्रमः।



## पठनप्रवर्तनानि

१. **सप्तविंशतिनक्षत्राणां नामानि लिखत। तेषां वृक्ष-पक्षि आदीनि चित्वा लिखत।**

श्रद्धेयः अंशः।

पट्टिकाकरणम्।

२. **एकस्मिन् सप्ताहे वारक्रमः कथं जायते इति कलनां कुरुत।**

श्रद्धेयः अंशः।

क्रमीकरणम्।



# अभ्यासः ।

१. **ऋतुक्रममनुसृत्य जीवनस्य आवश्यकताम् अधिकृत्य चर्चां कुरुत।**

आशयक्रोडीकरणम्।

आशयावतरणम्।

२. **राशिचक्रे मेषादीनां स्थितिं चित्रीकुरुत।**

आशयावतरणम्।

चित्रीकरणम्।